यच्चिद्धि शश्वता तना देवंदेवं यजामहे । त्वे इद्धूयते हवि: ।।६
प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्य: । प्रिया: स्वग्नयो वयम्।।७
स्वग्नयो हि वार्यं देवासो दधिरे च न: । स्वग्नयो मनामहे ।।८
अथा न उभयेषाममृत मर्त्यानाम् । मिथ: सन्तु प्रशस्तय: ।।९
बिश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वच:। :
चनो धा: सहसो यहो ।।१०।२१

हे अग्ने ! नित्य-प्रति विभिन्न देवताओं को पूजते हुए भी हम तुमको ही हवि देते हैं ।६। प्रजा पालक, होता, वरणीय, अग्नि हमको प्रिय हों । हम भी शोभायुक्त अग्नि वाले होकर उनके प्रिय बनें ।७। शोभनीय अग्नि सहित देवताओं ने जैसे हमारे लिए ऐश्वर्य धारण किया है, वैसे ही हम सुन्दर अग्नियों से युक्त हुए तुमको पूजते हैं ।८। हे मरण-धर्म-रहित अग्ने ! तुम्हारी ओर हम मरणशील मनुष्यों की प्रशंसायुक्त वाणियाँ परस्पर स्नेह वाली हों ।९। हे बल-पुत्र अग्ने ! तुम सब अग्नियों से युक्त हुए हमारी वाणी से प्रसन्न होओ ।१०। (२१)

सूक्त २७

(ऋषि-शुनःशेप: आजीगर्तिः । देवता-अग्नि और विश्वेदेवा ।
छन्द--गायत्री त्रिष्टुप्)

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
सम्राजन्तमध्वराणाम् ॥१
स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः । मीढ्वाँ अस्माकं बभूयात्॥२
स नो दूराच्चासाच्च नि मर्त्यादघायोः पाहि सदमिद् विश्वायुः ॥३
इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् । अग्ने देवेषु प्र वोचः ॥४
आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अन्तमस्य ।५।२२

हे अग्ने ! तुम बालों वाले अश्व के समान हो । यज्ञों के सम्राट्-समान प्रतिष्ठित अग्नि की स्तुतियों द्वारा पूजन के लिए मैं उपस्थित हूँ ।१। वह बल के पुत्र, विस्तीर्ण गमन-शक्ति वाले, शोभनीय सुखके ज्ञाता, अभीष्ट-वर्षक अग्नि हमारे हों ।२। सर्वत्र गमनशील अग्ने ! तुम हमको दूर या पास से भी, पाप करने की इच्छा वालों से सदा बचाते रहो ।३। हे अग्ने ! हमारे इस हवि-दान और नवीन स्तोत्र का देवताओं के सम्मुख उत्तम प्रकार से वर्णन करो ।४। अग्ने ! हमको उत्तम लोक प्राप्त कराओ । मध्य लोक में होने वाले अन्नों में हमें भागी बनाओ और समीपस्थ धन को हमें प्रदान करो ।५। (२२)

विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि॥६
यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥७
नकिरस्य सहन्त्य पर्येता कयस्य चित् । वाजो अस्ति श्रवाय्यः ॥८
स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता । विप्रेभिरस्तु सनिता ॥९
जराबोध तद् विविड्ढि विशेविशे यज्ञियाय ।
स्तोमं रुद्राय दृशीकम् ॥१०।२३

हे विभिन्न सामर्थ्य वाले अग्ने ! तुम धन को बाँटते हो। समुद्र की मर्यादा में बहने वाले जल के समान तुम यजमान के लिए तुरन्त प्रवाहमान होते हो ।६। अग्ने ! तुमने युद्धोंमें जिसकी रक्षाकी तथा युद्धों की ओर जिसको प्रेरित किया, वह अटल ऐश्वर्य प्राप्त करने वाला मनुष्य सदा स्वाधीन रहता है ।७। हे विजयशील ! उस पूर्वोक्त मनुष्य को कोई वश में नहीं कर सकता क्योंकि उसका बल-वर्णन करने योग्य हो जाता है ।८। वह अग्नि मनुष्यों के स्वामी हैं। हमको अश्वों-द्वारा युद्ध से पार करते हैं तथा ज्ञान-द्वारा धन देते हैं ।९। हे स्तुतियों के ज्ञाता अग्ने ! हमको मनुष्यों के पूज्य रुद्र के निमित्त सुन्दर स्तोत्र की प्रेरणा दो ।१०। (२३)

स नो महाँ अनिमानो धूमकेतुः पुरश्चन्द्रः । धिये वाजाय हिन्वन्तु ॥११
स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः ॥१२
नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।
यजाम देवान् यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ।१३।२३

वे अपरिमित धूम्र-ध्वज वाले अग्नि अत्यन्त प्रकाशित हैं। हमको बुद्धि और बल प्रदान करें ।११। प्रजा के स्वामी, देवताओं से सम्बन्धित, ज्ञानदाता, महान प्रकाश वाले वह अग्नि हमारे स्तोत्रों को ऐश्वर्यवानोंके समान सुनें।१२। बड़े, छोटे, युवक, वृद्ध सभीको हम नमस्कार करें। हम सामर्थ्यदान हों। देवताओं को पूजने वाले हों। हे देवगण ! मैं अपने से बड़ों का सदा आदर करूं ।१३। (२४)

सूक्त २८

(ऋषि—शुनःशेप आजीगर्तिः देवता—इन्द्रयज्ञसोमादयः ।
छन्द—गायत्री, अनुष्टुप्)

यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ।
उलूखलसुतानामवेविन्द्र जल्गुलः ॥१

यत्र द्वाविव जघनाधिषवण्या कृता ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥२
यत्र नार्यपच्यवमुपच्यवं च शिक्षते ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥३
यत्र मन्थां विबध्नते रश्मीन् यमितवा इव ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥४
यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ।५।२५

हे इन्द्र ! जहाँ कूटनेके लिए दृढ़ पत्थर का मूसल उठाया जाता है, वहाँ निष्पन्न किए सोमों को बारम्बार सेवन करो ।१। हे इन्द्र ! जहाँ दो जंघाओंके समान सोम कूटने वाले सिल लोढ़े अथवा दोफलक रखे हैं, उनसे तैयार किये हुए सोम-रसका पान करो ।२। जहाँ स्त्री सोम-रस तैयार करनेके लिये मूसल के कूटनेको डालने-निकालनेका अभ्यास करती है, हे इन्द्र ! वहाँ जाकर सोम-रस का सेवन करो ।३। सारथी-द्वारा घोड़े को रास से बाँधने की भाँति जहाँ मन्थन-दण्ड (मथानी) को रससे बाँध कर मन्थन करते हैं, उस स्थानको प्राप्त कर सोम-रस-पान करो ।४। हे ऊखल ! तुम घर-घर में, कामके लिये जातेहो, फिर भी हमारे इस घर में विजय-दुन्दुभि के समान शब्द करो ।५। (२५)

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥६
आयजी वाजसातमा ता ध्युच्चा विजर्भृतः ।
हरी इवान्धांसि बप्सता ॥७
ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः
इन्द्राय मधुमत् सुतम् ॥८
उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज ।
नि धेहि गोरधि त्वचि ।६।२६

हे ऊखल-मूसल वनस्पते ! वायु तुम्हारे सामने विशेष गति से चलती है। हे ऊखल ! उन इन्द्र को पीने के लिए सोमको सिद्ध करो ।६। महान बल के देने वाले पूजन-योग्य ये ऊखल और मूसल दोनों, अन्नोंका सेवन करते हुए अश्वके समान उच्च स्वरसे बोलते हैं ।७। हे ऊखल-मूसल रूप वनस्पते ! तुम सोम-सिद्ध करने वालों के लिये मधुर सोमों का इन्द्रके निमित्त निष्पीड़न करो ।८। ऊखल और मूसल-द्वारा कूटे गये सोम को पात्रसे निकाल कर पवित्र कुश पर रखो अवशिष्ट को चर्म-पात्र में रखो ।६। (२६)

सूक्त २९

(ऋषि–शुनःशेपः आजीगर्तिः । देवता–इन्द्रः । छन्द–पंक्तिः)

यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥१
शिपिन् वाजानां पते शचीवस्तव दंसना ।
आ तू न इन्द्र शंसय गोष्वश्वेषु सहस्रेषु शुभ्रिषु तुवीमघ ॥२
नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ । ३
ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥४
समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥५
पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषृ शुभ्रिषु सहस्रेषु तुवीमघ ॥६
सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ।७।२७

हे सत्य-स्वरूप सोमपायी इन्द्र ! यद्यपि हम निराश से हुए पड़े हैं,

फिर भी तुम अत्यन्त सुन्दर पुष्ट हजारों गाय-घोड़े देकर हमको सन्तुष्ट करो । १ । हे शक्तिशालिन, हे सुन्दर नासिका–युक्त इन्द्र ! आपकी दया हमको सदा मिली है। हमको हजारों गाय-घोड़े प्रदान करो । २ । हे इन्द्र ! परस्पर देखने वाली दोनों विपत्ति और दरिद्रताको अचेत कर दो। वे कभीं जागरणशील न रहें। हमको असंख्य गाय और अश्वों से युक्त करो ।३। हे इन्द्र ! हमारे शत्रु सोते रहें और मित्र जागरणशील हों हमको सहस्रों गौ और घोड़े दो ।४। हे इन्द्र ! इस पापपूर्ण स्तुति करने वाले गधेके समान हमारे शत्रु को मार डालो ! हमको सहस्र-संख्यक गौ, अश्व प्रदान करो ।५। कुटिल गति वाली वायु जङ्गम से भी दूर रहे। तुम हमको गौ धन आदि के दाता होओ ।६। हे इन्द्र! हमारा अशुभ चिन्तन करने वालोंको मार डालो। हिंसकों को नष्ट करो, असंख्य गौ, अश्व प्रदान करो ।७।   (२७)

सूक्त ३०

(ऋषि–शुनःशेपः आजीगर्तिः । देवता–इन्द्र–उषा । छन्द–गायत्री)

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।
                                        मंहिष्ठं सिञ्च इन्दुभिः ॥१
शतं वा यः शुचीनां सहस्रं वा समाशिराम् । एदु निम्नं न रीयते ॥२
सं यन्मदाय शुष्मिण एना ह्यस्योदरे । समुद्रो न व्यचो दधे ॥३
अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥४
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते । विभूतिरस्तु सूनृता ।५।२८

हे मनुष्यो ! तुमकों वाहु-बल प्राप्त कराने की इच्छा से महाबली इन्द्र को हम गढ़ेके समान सव ओर से सींचते हैं ।१। नीचे की ओर जाने वाले जल के समान हजारों कलश दूध में मिलाने के लिये सैकड़ों कलश गिरते हुए सोमों को इन्द्र प्राप्त करते हैं ।२। जल के लिए विस्तृत हुए समुद्र के समान इन्द्र बलकारी सोम के लिये अपने पेट को विस्तृत करता है ।३। हे इन्द्र ! यह सोम तुम्हारे लिए है। तुम इसे कबूतर द्वारा अपनी कबूतरी को प्राप्त

करने के समान प्रेम से प्राप्त करते हो हमारी वाणी भी पहुँचती है।४। हे धने-श्वर ! जिसके मुख में आपकी स्तुतिमय वाणी है, उसकी स्तुतियों से प्राप्त होने वाले तुम उस के घरमें ऐश्वर्य भर दो, उसकी वाणी मधुर और सत्य हो।५। (२८)

ऊर्ध्वस्तिष्ठा न ऊतये ऽस्मिन् वाजे शतक्रतो । समन्येषु ब्रवावहै ॥६
योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥७
आ घा गमद्यदि श्रवत् सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवम् ॥८
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् । यं ते पूर्वं पिता हुवे ॥९
तं त्वा वयं विश्ववारा शास्महे पुरहूत । सखे यसो जरितृभ्यः ।१०।२९

हे महाबली इन्द्र ! इस युद्ध में हमारी रक्षा के लिए उठो । हम दोनों भले प्रकार मन्त्रणा करें ।६। हे सखे ! हम प्रत्येक कार्य अथवा युद्धके आरम्भ में महाबली इन्द्र का आह्वान करते हैं ।७। यदि इन्द्रने हमारी पुकार सुन ली तो वे असंख्य रक्षक साधनों और शक्तियों के साथ अवश्य आयेंगे ।८। मैं अपने अग्रणी शक्ति-स्वरूप इन्द्र को पूर्वजों की भाँति बुलाता हूँ । हे इन्द्र हमारे पिता भी तुमकों बुलाते थे ।९। हे वरणीय इन्द्र ! बहुतों से बुलाये गये तुम स्तोताओं के शरणदाता मित्र हो । हम तुम्हारे आह्वान की कामना करते हैं ।१०। (२९)

अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम् । सखे वज्रिन्त्सखीनाम्॥११
तथा तदस्तु सोमपाः सखे वज्रिन् तथा कृणु । यथा त उश्मसीष्टये ॥१२
रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥१३
आ घ त्वावान् त्मनाप्तः स्तोतृभ्यो धृष्णवियानः ।
ऋणोरक्षं न चक्र्योः ॥१४

आ यद् दुवः शतक्रतवा कामं जरितॄणाम् ।
ऋणोरक्षं न शचीभिः ।१५।३०

हे सोमपायी वज्रिन् ! सोम से बलवान हुए हमारे मित्रों के तुम मित्र हो ।११। हे सोमपायी वज्रिन् ! हमारी यह इच्छा पूरी करो कि हम अपने अभीष्ट के निमित्त सदा तुम्हारी ही कामना किया करें ।१२। इन्द्र के प्रसन्न

होने पर हमारी गायें अधिक दूध दें, जिसमें हम अधिक पुष्टि को प्राप्त कर सकें ।१३। हे रुद्र ! तुम्हारी प्रार्थना करने पर तुम स्वयं ही पहिये की धुरी के समान भाग्य को घुमाकर धन देते हो ।१४। हे इन्द्र साधकों की साधना और कामना के अनुसार ही तुम पहिये की धुरीके समान उनकी दरिद्रता को पलट देते हो ।१५।

(३०)

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वेसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान् त्स नः सनिता सनये स नोऽदात् ॥१६
आश्विनावश्वावत्येषा योतं शवीरया । गोमद् दस्रा हिण्यवत् ॥१७
समानयोजनो हि वां रथो दस्रावमर्त्यः । समुद्रे अश्विनेयते ॥१८
न्यघ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः । परि द्यामन्यदीयते ॥१९
कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये । कं नक्षसे विभावरि ॥२०
वयं हि ते अमन्मह्यान्तादा पराकात् । अश्वे न चित्रे अरुषि ॥२१
त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः । अस्मे रयिं नि धारय ।२२।३१

इन्द्र सदा ही शत्रुओं के धन को अपने स्फूर्तियुत घोड़ों के द्वारा जीतता रहा है । अपने स्नेहवश हमको सोने का रथ प्रदान किया है ।१६। हे भीषण बल वाले अश्विनीकुमारो ! तुम अश्वों की गति से गौ और स्वर्णादि धन के साथ यहाँ आओ । १७ । हे अश्विनी कुमारो ! तुम दोनों के लिए जुतने वाला एक ही रथ आकाश मार्ग में चलता है । उसे कोई नष्ट नहीं कर सकता ।१८। हे अश्विनी-कुमारो ! तुमने अपने रथ के एक पहिये को पर्वत पर स्थित किया है तथा दूसरा पहिया आकाश के चारों ओर चलता है ।१९। हे पापों का नाश करने वाली उषे ! कौन मरणधर्मा मनुष्य तुम्हारे सुखको प्राप्त कर सकता है? ।२०। हे अश्व के समान गमन करने वाली, कांतिमती उषे ! तुम क्रोध-रहित का ही हमने निकट या दूर तक चिंतन किया है ।२१। हे आकाश-सुते ! तुम उन शक्तियों के साथ यहाँ आओ, जिनके द्वारा उत्तम ऐश्वर्य ही हमारे लिए स्थापना कर सको ।२२।

(३१)

सूक्त ३१ (सातवाँ अनुवाक)

(ऋषि—हिरण्यस्तूपः आङ्गिरसः । देवता—अग्नि । छन्द—त्रिष्टुप्)

त्वमग्ने प्रथम अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनाससो ऽजायन्त मरुतो भ्राजदृष्टयः ॥१
त्वमग्ने प्रथमो अङ्गिरस्तम कविर्देवानां परि भूषसि व्रतम् ।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥२
त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते ।
अरेजेतां रोदसी होतृवूर्ये ऽसघ्नोर्भारमयजो महो वसो ॥३
त्वमग्ने मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः ।
श्वात्रेण यत् पित्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः ॥४
त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः ।
य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि ।५।३२

हे अग्ने ! तुम अङ्गिरा ऋषि से सभी पहले हुए । होकर भी उनके और हमारे मङ्गलकी कामना वाले मित्र हो । मेधावी ज्ञान और कर्म वाले दमकते हुए शास्त्रों वाले मरुद्गण तुम्हारे नियम में प्रकट हुए हैं ।१। हे अग्ने ! तुम अङ्गिराओं में श्रेष्ठ और प्रथम हो । तुम देवताओं को नियमों से सुशोभित करते हो । लोक-व्यापक दो माथे वाले वाले ! मनुष्यों के हित के निमित्त विद्यमान हो ।२। हे अग्ने तुम सुन्दर कर्म की इच्छा से प्रकट हुए । होता के वरण करने पर तुम्हारे बल से आकाश-पृथिवी काँपते हैं । इसलिए तुमने यज्ञ का भार उठाकर देवताओं का पूजन किया है ।३। हे अग्ने ! तुम अत्यन्त श्रेष्ठ कर्म वाले हो । तुमने मनु और पुरूरवा राजा को स्वर्ग के सम्बन्ध में बताया था । जब मातृ-भूत-भूत दो काष्ठों में उत्पन्न होते हो तब तुम्हें पूर्वकी ओर ले जाते हैं ।४। हे पोषण-शक्ति वाले अग्ने ! स्रुक् हाथ में लिए हविदाता तुम्हारी स्तुति करता है तथा वषट्कार-सहित आहुति देता है । तुम प्रधान पुरुष उन यजमानों को प्रकाशित करते हो । ।५। (३२)

त्वमग्ने वृजिनवर्तनिं नरं सक्मन् पिपर्षि विदथे विचर्षणे ।
यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित् समृता हंसि भूयसः ॥६
त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे ।
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये ॥७
त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः ।
ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥८
त्वं नो अग्ने पित्रोरुपस्थ आ देवेष्वनवद्य जागृविः ।
तनूकृद् बोधि प्रमतिश्च कारव त्वं कल्याण वसु विश्वमोपिषे ॥९
त्वमग्ने प्रमतिस्त्वं पितासि नस् त्वं वयस्कृत् तव जामयो वयम् ।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥१०।३३

हे विशिष्ट द्रष्टा अग्ने ! तुम पाप-कर्मियों का भी उद्धार करते हो। तुम युद्ध उपस्थित होने पर थोड़े से धर्मवीरों द्वारा भी बहुसंख्यक पापियों को नष्ट करा देते हो ।६। हे अग्ने ! तुम उस सेवक कोभी अविनाशी पद देकर यशस्वी बनाते हो । उस पद की देवता और मनुष्य दोनों ही कामना करते हैं । तुम अपने साधकको अन्न-धन द्वारा सुखी करतेहो ।७। हे अग्ने ! हमको धन-प्राप्ति की योग्यता दो । साधकको यशस्वी बनाओ । नये उत्साहसे यज्ञादि कर्म करें। देवताओं-सहित आकाश-पृथिवी हमारे रक्षकहों ।८। हे निर्दोष अग्ने ! तुम देवताओंमें चैतन्य, आकाश-पृथिवी के मध्यमें स्थित, हमको पुत्र-रूप समझो । तुम शासकका कल्याण करने वाले उसे हर प्रकार का ऐश्वर्य दो।९। हे अग्ने ! तुम कृपा करन वाले हो । तुम्हें कोई धोखा नहीं दे सकता, तुम वीर-युक्त गुण वाले और सहस्रों धनों के कर्त्ता हो ।१०। (३३)

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन् नहुषस्य विश्पतिम् ।
इलामकृण्वन् मनुषस्य शासनीं पितुर्यत् पुत्रो ममकस्य जायते ॥११
त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥१२

त्वमग्ने येज्यवे पायुरन्तरो ऽनिषङ्गाय चतुरक्ष इध्यसे ।
यो रातहव्यो ऽवृकाय धायसे कीरेश्चिन् मन्त्रं मनसा वनोषि तम् ॥१३
त्वमग्न उरुशंसाय वाधते स्पार्हं यद् रेक्णः परमं वनोषि तत् ।
आध्रस्य चित् प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः।१४
त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।
स्वादुक्षद्मा यो वसतौ स्योनकृज् जीवयाजं यजते सोपमा दिवः।१५।३४

हे अग्ने ! तुमको देवताओं ने मनुष्यों का हित करने को उनका राजा (स्वामी) बनाया है । मेरे पिता (अङ्गिरा ऋषि)के पुत्र-रूप से जब तुम उत्पंन हुए तब देवताओं ने इड़ा को मनु की उपदेशिका बनाया ।११। हे अग्ने ! तुम्हारी कृपा से धनी हुए हमारे शरीरोंका पोषण और रक्षण करो । अविलम्ब हमारी सन्तान और पशुओंकी रक्षा करो ।१२। हे अग्ने ! तुम पूजकके पालन-कर्त्ताहो । जिससे तुमको अहिंसित हवि दी है और जो निरस्त्र है,उसे तुम सब ओर से देखते हो । तुम अपने साधक की कामना पर ध्यान देते हो ।१३। हे अग्ने ! उत्तम अभीष्ट धन को ऋत्विज के निमित्त साध्य करते हो । तुम निर्बल के पिता और मूर्ख को ज्ञान देने वाले हो ।१४। हे अग्ने ! तुम दक्षिणा वाले यजमान के लिए कवच के समान रक्षक हो । जो अपने घर में मधुर अग्नि-हविसे सुख देने वाले यज्ञ को करता है, वह स्वर्गीय उपमाका अधिकारी होता है ।१५। (३४)

इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन् मर्त्यानाम् ॥१६
मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत् सदने पूर्ववच्छुचे ।
अच्छ याह्या वहा दैव्यं जन मा सादय बर्हिषि यक्षि च प्रियम् ॥१७
एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत् ते चकृमा विदा वा ।
उत प्र णेष्यभि वस्यो अस्मान् त्सं नः सृज सुमत्या वाजवत्या ।१८।३५

हे अग्ने ! तुम हमारे यज्ञ में हुई भूलों को क्षमा करो । जो कुमार्ग में बहुत बढ़ गया है, उसे क्षमा करो । तुम सोम वाले यजमान के बन्धु, पिता

और उस पर कृपा करने वाले हो ।१६। हे अग्ने ! हे अङ्गिरा ! तुम अत्यन्त पवित्र हमारे यज्ञ को प्राप्त होओ । पूर्वकाल में मनु, अङ्गिरा, ययाति के यज्ञ में आने वाले देवताओं को बुलाकर कुश पर प्रतिष्ठित करते हुए उनका पूजन करो ।१७। हे अग्ने ! इन मन्त्र रूप-स्तुतियों से वृद्धि को प्राप्त होओ । यह स्तुति-शक्ति ज्ञान से तुम्हारे निमित्त ही हमने प्राप्त की है । तुम हमको ऐश्वर्य प्रदान करो और बल देने वाली बुद्धि दो ।१८। (३५)

सूक्त ३२

(ऋषि–हिरण्यस्तूपः आङ्गिरसः । देवता–इन्द्रः । छन्द–त्रिष्टुत्)

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥१
अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ॥२
वृषायमाणो ऽवृणीत सोमं त्रिकद्रुकेष्वपिवत् सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥३
यदिन्द्राहन् प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।
आत् सूर्यं जनयन् द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥४
अहन् वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाऽहिः शयत उपपृक् पृथिव्याः ।५।३६

पूर्वकाल में वज्रधारी इन्द्र ने जो पराक्रम किए, उन्हें कहता हूँ । पहिले इन्होंने मेघ को मारा, फिर वर्षा की । प्रवाहित नदियों के लिए मार्ग बनाया ।१। इस इन्द्र के लिए त्वष्टा ने शब्दकारी वज्र को पैदा किया, जिससे पर्वत में टिके हुए मेघ को मारकर जल निकाला ! वे जब रम्भाती हुई गायों के समान सीधे समुद्र को चले गये ।२। बैल के समान बल से इन्द्र ने सोम का विवरण किया । त्रिकद्रु की (तीन प्रकार के) यज्ञ में सींचे हुए सोम को पिया । धनेश

इन्द्रने वज्र को ग्रहण कर मेघों में उत्पन्न जलको वेधा ।३। हे इन्द्र तुमने मेघों में उत्पन्न प्रथममेघ (वृत्र)का वध किया, प्रपंचियोंका नाश किया । फिर सूर्य, उषा लौर आकाश को प्रकट किया तब कोई शत्रु शेष नहीं रहा ।४। इन्द्र से घोर अन्धकार करने वाले वृत्रासुर का भीषण वज्र से वृक्षों के तनों के समान काट डाला । तब वह पृथिवी पर गिर पड़ा ।५। (३६)

अयोद्धेव दुर्गद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातीरीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥६
अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद् व्यस्तः ॥७
नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद् वृत्रो महिना पर्यतिष्ठत् तासामहिः पत्सुतःशीर्बभूव ॥८
नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसीद् दानुः शये सहवत्सा न धेनुः ॥९
अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ।१०।३७।

मिथ्याभिमामी वृत्र ने महाबली, शत्रुनाशक, अत्यन्त वेग वाले इन्द्र को नौसिखिए को बुलाने के समान ललकारा । तब इन्द्र ने घोर जय-वर्षा की, जिससे बहते हुए वृत्रने नदियोंको भी पीस वाला ।६। पाँव और हाथों से हीन वृत्र ने इन्द्र से युद्ध की इच्छा व्यक्त की । इन्द्र ने उसके कन्धे पर वज्र प्रहार किया । तब वह क्षत-विक्षत हो धराशायी हुआ ।७। जैसे नदी-तटों को लाँघ जाते हैं, वैसे ही मन को प्रसन्न करने वाले जल वृत्र को लाँघ जाते हैं । जो वृत्र अपने बल से जलों को रोक रहा था, वही अब उनके नीचे पड़ा सो रहा है ।८। वृत्र की माता उसकी रक्षाके लिए उसकी देह पर टेढ़ी होकर छागई । परन्तु इन्द्र के प्रहार करने पर वह बछड़े के साथ गौ के समान सो गयी ।९। स्थितिहीन अविश्रान्त जलों के मध्य गिरे हुए वृत्रासुर के देह को जल जानते हैं । वह अनन्त निद्रा में लीन पड़ा है ।१०। (३७)

दासपत्नीरहिगोपा अतिष्ठन् निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद् ववार ॥११
अश्व्यो वारो अभवस्तदिन्द्र सृके यत् त्वा प्रत्यहन् देव एकः ।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून् ॥१२
नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद् ध्रादुनिं च ।
इन्द्रश्च यद् युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥१३
अहेर्यातारं कमपश्य इन्द्र हृदि यत् ते जघ्नुवो भीरगच्छत् ।
नव च यन् नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि ॥१४
इन्द्रो यातो ऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान न नेमिः परि ता वभूव ।१५।३८

जैसे गायें छिपी हुई थीं, वैसे ही जल भो रुके हुए थे । इन्द्र ने वृत्र को मारकर उसके द्वार को खोल दिया ।११। हे इन्द्र ! जब तुम पर वृत्र ने प्रहार किया तब तुम घोड़े के बाल के समान हो गये । हे वीर ! तुमने गौओं और सोमों को जीतकर सातों समुद्रों को प्रवाहित किया ।१२। वृत्र द्वारा छोड़ी हुई बिजली, मेघ की गर्जना, जल-वर्षा भीषण वज्रभी इन्द्र का स्पर्श न कर सके । उस युद्ध में इन्द्र ने उसे हर प्रकार जीत लिया ।१३। हे इन्द्र ! तुमने वृत्र पर आक्रमण करते हुए क्या किसी अन्य आक्रमणकारीको देखा,जिसके कारण तुम बाज पक्षी के समान निन्यानवे नदियों के पार चले गये ।१४। वज्रधारी इन्द्र सभी स्थावर, जङ्गम प्राणियों के स्वामी हैं । वही मनुष्यों पर शासन करते हैं। पहियों की लीक जैसे रथ को धारण करती है। वैसे ही इन्द्र ने इन सबकों व्यवस्थित कर लिया ।१५।　　　　(३८)

॥ द्वितीयोऽध्यायः समाप्तः ॥

सूक्त ३३

(ऋषि–हिरण्यस्तूप, आङ्गिरस । देवता–इन्द्रः । छन्द–त्रिष्टुप)

एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः ॥१

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् ॥२
नि सर्वसेन इषुधींरसक्त समर्यो गा अजति यस्य वष्टि।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥३
वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र।
धनोरधि विषुणक् ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥४
परा चिच्छीर्षा ववृजुस्त इन्द्राऽयज्वानो यज्वभिः स्पर्धमानाः।
प्र यद् दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः ।५।१

आओ गाय की इच्छा वाले हम इन्द्र के समक्ष उपस्थित हों । वे विघ्न-नाशक, हमारे धनको बढ़ाते हुए, हमारी गौ की इच्छाको पूण करेंगे ।१। जैसे युद्ध में स्तोता बुलाते हैं, उस इन्द्र का कोई सामना नहीं कर सकता। मैं उस धनदाता इन्द्र की उपयुक्त स्तोत्रोंसे पूजन करता हुआ अभिलाषा करता हूँ ।२। सेना वाले इन्द्रने स्तोताओं के पक्षमें तूणीर किस लिये। प्रजाओंके स्वामी वे इन्द्र गवादि धन को जीतने में समर्थ हैं। हे इन्द्र ! तुम हमारे साथ विनिमय करने वाले न बनो ।३। हे इन्द्र सहायक मरुतों के साथ अपने भीषण वज्र से बहुत धन के चोर वृत्र को तुमने मारा। फिर उस वृत्र के अनुचरों ने संगठित होकर तुम पर आक्रमण किया, तब वे यज्ञ-कर्मों से हीन मृत्यु को प्राप्तहुए ।४। हे इन्द्र ! यज्ञ-कर्म वालों के सामने से अयाज्ञिक भाग गये। हे अश्वयुक्त, युद्धमें डटे रहने वाले भीषण इन्द्र ! तुमने आकाश और पृथिवी पर स्थित व्रत-हीनों को निःशेष कर दिया ।५।   (१)

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ॥६
त्वमेतान् रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे।
अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः शंसमावः ॥७

चक्राणास: परीणहं पृथिव्या हिरण्येन मणिना शुम्भमाना: ।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात् सूर्येण ॥८
परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वत: सीम् ।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ॥९
न ये दिव: पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन् ।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् ।१०।२

अयाज्ञिकों ने अनिन्द्य इन्द्र से लड़ने की इच्छा की । तब वीरों के साथ कायरों के युद्ध करनेके समान परास्त हुए ।६। हे इन्द्र ! तुमने रोते और हँसते हुये वृत्रों को युद्ध में मारा । चोर वृत्र को ऊँचा उठाकर आकाश से जलाकर गिराया । फिर तुमने सोम वालोंकीं स्तुतियोंसे हर्ष प्राप्त किया ।७। उन वृत्रों ने भूमि को ढक लिया, वे स्वर्ण-रत्नादि से युक्त हुए । परन्तु वे इन्द्र को न जीत सके । इन्द्र ने उन्हें सूर्यके द्वारा भगा ।८। हे इन्द्र ! तुमने आकाश-पृथिवी का सब ओर से उपयोग किया है । तुमने अपने अनुयाइयों द्वारा विरोधियोंको जीता । तुम्हारी मन्त्र-रूप स्तुतियों ने शत्रु पर विजय प्राप्त की ।९। मेघ आकाश-पृथिवी की सीमा को प्राप्त नहीं करते और गर्जन करते हुए अन्धकारादि कर्मों से भी सूर्य रूप इन्द्र को नहीं ढक सकते परन्तु इन्द्र अपने सहायक वज्र से, मेघ से जलों को गाय के समान दुह लेता है ।१०। (२)

अनु स्वधामक्षरन्नापो अस्याऽवर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥११
न्याविध्यदिलीबिशस्य दृह्ला वि शृङ्गिणमभिनच्छुष्णमिन्द्र: ।
यावत्तरो मघवन् यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥१२
अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सं वज्रेणासृजद् वृत्रमिन्द्र: प्र स्वां मतिमतिरच्छाशदान: ॥१३
आव: कुत्समिन्द्र यस्मिञ्चाकन् प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥१४

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।
ज्योक चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ।१५।३

स्वेच्छानुसार बहने वाले जलों में वृत्र बढ़ने लगा, तब इन्द्र ने उसे अपने शक्ति-साधनों से मार डाला ।११। इन्द्र ने भूमि की गुफा में सोये हुए वृत्र के गढ़ों का भेदन किया और उस सींग वाले को ताड़ना दी । हे धनवान् इन्द्र ! तुमने अपने बल-वेग से शत्रु को नष्ट कर दिया ।१२। इन्द्र के वज्र ने शत्रुओं को लक्ष्य कर तीक्ष्ण वर्षा के जल से उनके दुर्गों को छिन्न-भिन्न किया, उन्हें वज्र से मारकर स्वय उत्साहित हुआ ।१३। हे इन्द्र ! तुम जिस "कुत्स" को चाहते थे, उसकी तुमने रक्षा करते हुए 'दशायु' नामक बैल को भी बचाया । अश्वके खुरों से धूल उड़कर आकाश तक फैल गई तब भी तुम रण-क्षेत्रमें खड़े रहे ।१४। हे इन्द्र ! भूमि की इच्छा से जल में गये हुए 'श्वेत्रेय" की तुमने रक्षा की। जलों पर ठहरकर चिरकाल तक युद्ध करते रहे । शत्रुओं के ऐश्वर्य को तुमने जलों के नीचे पहुँचा दिया ।१५। (३)

सूक्त ३४

(ऋषि–हिरण्यस्तूप आङ्गिरसः । देवता–अश्विनौ । छन्द–जगती, त्रिष्टुप्)

त्रिश्चिन् नो अद्या भवतं नवेदसा विभुवाँ याय उत रातिरश्विना ।
युवोर्हि यन्त्रं हिम्येव वाससो ऽभ्यार्यसेन्या भवतं मनीषिभिः ।।१
त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद् विदुः ।
त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ।।२
समाने अहन् त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् ।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुपसश्च पिन्वतम् ।।३
त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।
त्रिर्नान्द्यं वहतमश्विन युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ।।४
त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताताता त्रिरुता धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस् त्रिष्ठं वा सूरे दुहिता रुहद् रथम् ।।५

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः ।
ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ।६।४

हे मेधावी अश्विनीकुमारो ! यहाँ आज तीन बार आओ । तुम्हारा मार्ग और दान दोनों ही विस्तृत हैं । जाड़ों में वस्त्रोंके सहारे की भाँति हमको तुम्हारा ही सहारा है । तुम विद्वानोंके माध्यम से हमको प्राप्त होओ ।१। तुम्हारे मिष्टान्न ढोने वाले रथ में तीन पहिए हैं । देवताओं ने यह बात चन्द्रमा की प्रिय पत्नीके विवाह के समय जानी । उसमें सहारेके लिए तीन खम्भे लगे हैं । हे अश्विनो कुमारो ! तुम उस रथ से रात्रि में तीन-तीन बार गमन करते हो ।२। हे दोष कों ढकने वाले अश्विनीकुमारो ! तुम दिनमें तीन बार विशेष कर आज तीन बार यज्ञ को मधुर रस से सींचो और दिन-रात में तीन-तीन बार हमारे लिए अन्नों को लाओ ।३। हे कुमारद्वय ! तुम तीन बार हमारे घर आओ । तुम अपने अनुयायी जनको तीनबार सुरक्षित करो। हमको तीन बार सुखदायक पदार्थ तथा तीनबार ही दिव्य अन्न प्राप्त कराओ ।४। हे अश्विद्वय ! हमें तीन बार धन दो । हमारी वृत्तियों को तीनबार देवाराधन में प्रेरित करो । हमको सौभाग्य और यशभी तीन-तीन बारदो । तुम्हारे रथ पर सूर्य-पुत्री (उषा) चढ़ी हुई है ।५। हे अश्विद्वय ! हमें रोगनाशक दिव्यऔषधियाँ तीन बार दो । पार्थिव औषधियाँ तीन बार दो । जलोंसे तीन बार रोगों को नाश करो हमारी सन्तान की रक्षा करो और सुख दो सब सुखों को तिगुने रूप में प्रदान करो ।६। (४)

त्रिर्नो अश्विना यजता दिवेदिवे हरि त्रिधातु पृथिवीमशायतम् ।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ।।७
त्रिरश्विना सिन्धुभिः सप्तमातृभिस् त्रय आहावास्त्रेधा हविष्कृतम् ।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम् ।८
क्वत्री चक्रा त्रिवृतो रथस्य क्व त्रयो वन्धुरो ये सनीलाः ।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ।।९

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः ॥१०
आ नासत्य त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमंश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥११
आ नो अश्विना त्रिवृता रथेनाऽर्वाञ्चं रयिं वहतं सुवीरम् ।
शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ।१२।५

हे अश्विद्वय ! तुम नित्य तीन बार पूजने योग्यहो । तुम पृथिवीपर तीन बार तीन लपटे वाले कुशासनपर सोओ । हे असत्य-रहित रथी ! आत्मा-द्वारा शरीरों को प्राप्त करने के समान तुम तीन यज्ञोंको प्राप्त कराओ ।७। हे अश्विद्वय ! सप्त मातृ-भूत जलों द्वारा हमने तीन बार सोमों कों सिद्ध किया है। यह तीन कलश भरकर है । इसी प्रकार से हवि भी तैयारकी है । तुम आकाश केऊपर चलते हुए तीनों लोकोंकी रक्षा करतेहो।८। हे अश्विद्वय ! जिस रथ के द्वारा तुम यज्ञको प्राप्त होते हो, उस त्रिकोण रथके तीन पहिए किधर लगे हैं ? रथ के आधारभूत तीनों काष्ठ कहाँ है ? तुम्हारे रथ में बलशाली गर्दभ कब संयुक्त किया जायेगा ? ।९। हे अश्विद्वय ! आओ, मैं हव्य देता हूँ ।अतः मधु पान करने वाले सुखों से मधुर हवियों की ग्रहण करो । उषा काल से पूर्व तुम्हारे घृतयुक्त रथको यज्ञ में आनेके लिए प्रेरणा देते हैं ।१० । हे असत्य-रहित अश्वियो ! तुम तेंतीस देवताओं के साथ यहाँ आकर मधु-पान करो। हमको आयु देकर पापों को हटाओ । शत्रुओं को भगाकर हम में वास करो ।११। हे अश्वियो ! त्रिकोण रथ-द्वारा, वीरों से युक्त ऐश्वर्य को यहाँ लाओ। तुम्हारा आह्वान करता हूँ । तुम युद्धों में हमारी बल-वृद्धि करो।१२। (५)

सूक्त ३५

(ऋषि—हिरण्यस्तुप, आङ्गिरसः । देवता—अग्नि मित्रावरुणौ, प्रकृतिः छन्द—जगती, त्रिष्टुप्, पंक्तिः)

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥१

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥२
याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥३
अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम् ।
आस्थाद् रथँ सविता चित्रभानुः कृष्णा रजांसि तविषी दधानः ॥४
वि जनाञ्छ्यावाः शितिपादो अख्यन् रथं हिरण्यप्रउगं वहन्तः ।
शश्वद् विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥५
तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेत ॥६।६

कल्याण के लिए अग्नि, मित्र और वरुण का आह्वान करता हूँ और प्राणियों को विश्राम देने वाली रात्रि तथा सूर्य देवता का रक्षा के लिये आह्वान करता हूँ ।१। अन्धकार पूर्ण में भ्रमण करते हुए प्राणियों को चैतन्य करने वाले सूर्य सोने के रथसे हमको प्राप्त होते हैं ।२। वे सूर्य देवता नीचे मार्गों या ऊँचे मार्गों पर श्वेत अश्वों से युक्त रथ पर गमन करते हैं वे अन्धकारादि का नाश करते हुए दूर से आते हैं ।३। पूज्य एवं अद्भुत रश्मियों से युक्त सूर्य, अन्धकारयुक्त लोकों के निमित्त शक्ति को धारण करते हैं । वे स्वर्ण-साधनों से युक्त रथ पर चढ़ते हैं ।४। श्वेत आश्रय वाले, जुओंको बांधने वाले स्थान-युक्त रथ को चलाते हुए सूर्यके अश्वों ने मनुष्यों को प्रकाश दिया । सब प्राणी और लोक सूर्य के अङ्क में ही स्थित हैं ।५। तीन लोकों में पृथिवी सूर्य के समीप हैं । एक अन्तरिक्ष यमलोक का द्वार-रूप है । रथ के पहिए की अगली कील अवलम्बित रहने के समान सभी नक्षत्र सूर्य पर अवलम्बित हैं ।६। (६)

वि सुपर्णो अन्तरिक्षाण्यख्यद् गभीरवेपा असुरः सुनीथः ।
क्वेदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥७
अष्टौ व्यख्यत् ककुभः पृथिव्यास् त्री धन्व योजना सप्त सिन्धून् ।

हिरण्याक्षः सविता देव आगाद् दधद्रत्ना दाशुषे वार्याणि ॥८
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवां बाधते वेति सूयमभि कृष्णेन रजसा द्यामृणोति ॥९
हिरण्यहस्तो असुरः सुनीथः सुमृलीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन् रक्षसो यातुधानानस्थाद् देवः प्रतिदोषं गृणानः ॥१०
ये ते पन्थाः सवितः पूर्व्यासो ऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव।११।७

गम्भीर कम्पनयुक्त, सुन्दर प्राणयुक्त सविता ने अन्तरिक्ष को प्रकाशित किया है। वह सूर्य कहाँ रहता है, उसकी किरणें किस आकाश में व्याप्त हैं—यह कौन कह सकता है ? ।७। सूर्य ने पृथिवी की आठों दिशाओं को मिलाने वाले तीनों को और सातों समुद्रोंको प्रकाशित किया। वह स्वर्णिम नेत्र वाले सूर्य साधक को धन देने के निमित्त यहाँ आवें ।८। सोनेके हाथ वाले सर्वद्रष्टा सूर्य आकाश और पृथिवी के मध्य गति करते हैं। वे रोगादि बाधाओं को मिटाकर अन्धकार नाशक तेज से आकाश को व्याप्त कर देते हैं ।९। सुवर्ण-पाणि, प्राणवान्, श्रेष्ठ, कृपालु, ऐश्वर्यवान्, सूर्य हमारे सामने आवें। वे सूर्य नित्यप्रति राक्षसों का दमन करते हुए यहाँ ठहरें ।१०। हे सूर्य ! आकाश में तुम्हारे धूल-रहित पुरातन मार्ग सुनिर्मित हैं। उन मार्गोंसे आकर हमारी रक्षा करो। जो मार्ग हमारे अनुकूल हो, उसे बताओ ।११। (७)

सूक्त ३६ (आठवाँ अनुवाक)

(छन्द—कण्वो घौरः। देवता—अग्निः। छन्द—बृहती आदि)

प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईलते ॥१
जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।
स त्वं नो अद्य सुमना इहाविता भव। वाजेषु सन्त्य ॥२
प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।

महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥३
देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ।४
मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ।५।८

हे मनुष्यो ! तुम बहु-संख्यक व्यक्ति देवताओं की कामना करते हो । तुम्हारे निमित्त हम उन महान् अग्नि के सूक्त-वचनों द्वारा प्रार्थना करते हैं । उनकी अन्य लोग भी स्तुति करते हैं ।१। मनुष्यों ने जिस बलवर्द्धक अग्नि को धारण किया है, हम उसको हवियों से तृप्त करें । दानी ! तुम प्रसन्न होकर, इस युद्धमें हमारी रक्षा करो ।२। हे सम्पूर्ण ऐश्वय वाले, देव-दूत और होता ! तुम्हारा हम वरण करते हैं । तुम महान् और सत्य-रूप हो । तुम्हारी लपटें आकाश की ओर उठती हैं ।३। हे अग्ने ! तुम पुरातन पुरुष को वरुण, मित्र और अर्यमा प्रदीप्त करते हैं । तुमको हवि देने वाला साधक सभी धनों को प्राप्त करता है ।४। हे अग्ने ! तुम मन को प्रसन्न करने वाले, प्रजाओं के स्वामी, गृह-पालक और देवदूत हो । देवताओं के सभी कर्म तुम में मिलते हैं ।५। (८)

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥६
तं घेमित्था नमस्विन उप स्वराजमासते ।
होत्राभिरग्नि मनुषः समिन्धते तितिर्वांसो अति स्रिधः ॥७
घ्नन्तो वृत्रमतरन् रोदसी अप उरु क्षयाय चक्रिरे ।
भुवत् कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥८
सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥९
यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ।१०।९

हे युवा अग्ने ! तुम सौभाग्यशाली हो क्योंकि तुममें ही सब हवियाँ डाली जाती हैं। तुम प्रसन्न होकर हमारे निमित्त आज और आगेभी पराक्रमी देवताओं का पूजन करो ।६। नमस्कार करने वाले व्यक्ति स्वयं प्रकाशित अग्निकी पूजा करते हैं। शत्रुओं से डरे हुए मनुष्य स्तुतियों द्वारा अग्नि को प्रदीप्त करते हैं ।७। देवताओं ने प्रहार पूर्वक वृत्र को जीता और तीनों लोकों का विस्तार किया। अभीष्ट-वर्षकक अग्नि आह्वान करनेपर मुझ कण्वको गवादि धन प्रदान करें ।८। हे अग्ने ! आओ, विराजमान होओ। देवताओ के जान वाले, तुम चैतन्य होओ। उत्तम लालिमा लिए सुन्दर धुएँ को फैलाओ ।९। हे हविवाहक अग्ने ! तुम पूजने-योग्य को देवताओं ने मनुके निमित्त इस लोक में स्थापित किया। तुम धन से सन्तुष्ट करने वाले को कण्व और मेधातिथि ने तथा वृषा और उपस्तुत ने धारण किया ।१०। (९)

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस् तमग्निं वर्धयामसि ॥११
रायस्पूर्धि स्वधावोऽस्ति हि ते ऽग्ने देवेष्वाप्यम् ।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृल महाँ असि ॥१२
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥१३
ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः ॥१४
पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य ।१५।१०

जिस अग्नि को मेधातिथि और कण्व ने यज्ञ के लिए प्रज्वलित किया, वह अग्नि दीप्तिमान् है। इन ऋचाओं द्वारा हम उस अग्निको बढ़ाते हैं ।११। हे अन्नवान् अग्ने ! हमारे भण्डार भरो। तुम देवताओं के मित्र और ऐश्वर्य के स्वामी हो। हे महान् ! हम पर कृपा करो ।१२। तुम हमारी रक्षा के लिए ऊँचे खड़े होओ। तुम उन्मत्त शक्तिके प्रदाता हो। हम विद्वानों के सह-

योग से तुम्हारा स्तवन करते हैं ।१३। तुम उन्नत हुए पाप से हमारी रक्षा करो । मनुष्यो-भक्षकोंको भस्म कर हमको जीवनमें प्रगति करने के लिए ऊँचा उठाओ । हमारे कार्यों को देवताओं के प्रति निवेदित करो ।१४। हे अग्ने ! दैत्यों से रक्षा करो । दान करने वालों को बचाओ । तुम महान् दीप्ति वाले, निपट युवा और हिंसकों से रक्षा करने वाले हो, हमारी रक्षा करो ।१५।

(१०)

घनेव विष्वग्वि जह्यरोव्णस् तपुर्जम्भ यो अस्मध्रुक् ।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥१६
अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन् मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् ।१७
अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ।।१८
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१९
त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमित् यातुमावतो विश्वं समत्रिणं दह ।२०।११

हे सन्ताप देने वाली दाढ़ों वाले अग्नि देव ! दृढ़ सोंटे से मारने के समान दान न देने वाले को मारो । हमारे द्रोहियों और रात्रि में हमारे लिए शस्त्र पैनाने वालों के आधिपत्य को रोको ।१६। अग्नि ने मेरे निमित्त सौभाग्य की इच्छा की । उन्होंने मेधातिथि और उपस्तु की धन-प्राप्ति के लिए रक्षा की ।१७। "तुर्वश" "यदु" और "उग्रदेव" को अग्नि के साथ दूर से बुलाते हैं । वे "नावस्त्व" बृहद्रथ" और "तुर्वीति" को भी यहाँ बुलावें ।१८। हे ज्योतिर्मान् अग्ने ! तुमको मनुष्यों के लिये मनु ने स्थापित किया । तुम यज्ञ के लिए प्रकट होकर हवि से तृप्त हो । साधक तुमको नमस्कार करते हैं ।१९। अग्नि की प्रदीप्त ज्वालाएँ बलवती और उग्र होती है

उनका सामना नहीं किया जा सकता। हे अग्ने! तुम राक्षसोंको और मनुष्य-भक्षियोंको भस्म करी।२०। (११)

सूक्त ३७

(ऋषि—कण्वो घौरः। देवता—मरुत। छन्द—गायत्री)

क्रीलं वः शर्धो मारुतमनर्वाणं रथेशुभम्। कण्वा अभि प्र गायत ॥१
ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः। अजायन्त स्वभानवः।२
इहेव शृण्व एषां कशा हस्तेषु यद् वदान्। नि यामञ्चित्रमृञ्जते ॥३
प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे। देवत्तं गायत ॥४
प्र शंसा गोष्वघ्न्यं क्रीलं यच्छर्धो मारुतम्। जम्भे रसस्य वावृधे।५।१२

हे कण्व गोत्र वाले ऋषियों! क्रीड़ायुक्त अहिंसित मरुद्गण रथपर सुशोभित हैं। उनके लिए स्तुति-गान करो।१। वे स्वयं प्रकाश वाले, बिन्दुचिह्न-युक्त मृग-वाहन शस्त्रों, युद्ध में ललकारों आभूषणादिसे युक्त उत्पन्न हुए हैं।२। इनके हाथों में चावुक का शब्द हम सुन रहे हैं। यह अद्भुत चाबुक युद्ध में साहस बढ़ाने वाली है।३। वे मरुद्गण तुम्हारे बल कों बढ़ाते और यशस्वी बनाते हैं, उन शत्रु-नाशक की स्तुति करो।४। दुग्धदात्री धेनुओंने बैलसे क्रीड़ा करने वाले मरुद्गण की स्तुति की। वह वृष्टि-रूप रस को पीकर वृद्धि को प्राप्त हुए हैं।५। (१२)

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः। यत् सीमन्तं न धूनुथ॥६
नि वो यामाय मानुषो दध्र उग्राय मन्यवे। जिहीत पर्वतो गिरिः ॥७
येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः भिया यामेषु रेजते ॥८
स्थिरं हि जानमेषां वयो मातुर्निरेतवे। यत् सीमनु द्विता शवः ॥९
उद् त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत। वाश्रा अभिज्ञु यातवे।१०।१३

आकाश-पृथिवी को कम्पित करने वाले मरुतो! तुममें बड़ा कौन है? तुम वृक्ष की डालियों के गमान लोकों को हिलाते हो।६। हे मरुतो! तुम्हारी गति और क्रोध से भयभीत मनुष्यों ने सुदृढ़ खम्भे खड़े किए हैं। तुम बड़े

जोड़ों वाले पर्वतों को भी कँपा देते हो ।७। उन मरुतों की गति से पृथिवी वृद्ध राजा के समान भय से काँपती है ।८। इनका जन्म-स्थान स्थिर है । उनकी मातृ-भूमि आकाश में पक्षी की गति भी निर्बाध है । उनका बल दुगुना होकर व्याप्त है ।९। ये अन्तरिक्ष में उत्पन्न मरुद्गण गमन के लिये जल का विस्तार करते हैं । और रम्भाने वाली गायों को घुटने-घुटने जल में ले जाते हैं ।१०। (१३)

त्यं चिद् घा दीर्घं पृथुं मिहो नपातममृध्रम् । प्र च्यावयन्ति यामभिः ।११
मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरीँरचुच्यवीतन ।।१२
यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना । शृणोति कश्चिदेषाम् ।।१३
प्र यात शीभमाशुभिः सन्ति कण्वेषु वो दुवः । तत्रो षु मादयाध्वै ।।१४
अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम् ।
विश्वं चिदायुर्जीवसे ।१५।१४

अवश्य ही मरुद्गण उस विशाल, अबाध्याय वेन-पुत्र को अपनी गति से कँपाते हैं ।११। हे मरुतो तुमने अपने बल से मनुष्यों को कर्म में प्रेरित किया है । तुम्हीं मेघों को प्रेरित करने वाले हो ।१२। मरुद्गण चलते हैं, तब मार्ग में परस्पर बातें करते हैं । उनके उस शब्द को सुनते हैं ।१३। हे मरुतो ! वेग वाले वाहनसे शीघ्र आओ । यह कण्ववंशी और अन्य विद्वान एकत्रित हैं उनके द्वारा हर्ष प्राप्त करो ।१४। हे मरुतो ! तुम्हारी प्रसन्नता के लिए हवि प्रस्तुत है । हम आयु प्राप्त करने के लिए यहाँ विद्यमान हैं ।१५। (१४)

सूक्त ३८

(ऋषि—कण्वो घौरः । देवता—मरुतः । छन्द—गायत्री)

कच नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः ।।१
क्व नूनं कद् वो अर्थं गन्ता दिवो न पृथिव्याः ।
क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता । क्वो विश्वानि सौभगा ।।३
यद् यूयं पृश्निमातरो मर्तासः स्यातन । स्तोता वो अमृतः स्यात् ।।४
मा वो मृगो न यवसे जरिता भूदजोष्यः । पथा यमस्य गादुप ।५।१५

हे स्तुतियों को चाहने वाले मरुतो ! तुम्हारे लिए कुशा बिछायी गयी है। पिता-द्वारा पुत्र को धारण करने के समान तुम हमें कब धारण करोगे ? ।१। हे मरुतो ! अब तुम कहाँ हो ? किसलिए आकाश मार्ग में घूमते हो ? पृथिवी में क्यों नहीं घूमते ? तुम्हारी गौएँ तुम्हें नहीं पुकारतीं क्या ? ।२। हे मरुतो ! तुम्हारी अभिनव कृपाएँ, शुभ और सौभाग्य कहाँ हैं ? ।३। हे आकाश-पुत्रो ! यद्यपि तुम मरणधर्मा पुरुष हो तुम्हारा स्तोता (उपदेष्टा) अमर और शत्रु से कभी नष्ट न होने वाला हो ।४। जिस प्रकार घास के मैदान में मृग आहार प्राप्त करता है पर मृग के लिए घास असेवनीय नहीं होती उसी प्रकार स्तोता भी सेवा प्राप्त करता रहे जिससे उसे यम-मार्ग से न जाना पड़े ।५। (१५)

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् । पदीष्ट तृष्णया सह ॥६
सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः । मिहं कृण्वन्त्यवाताम् ॥७
वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि॥८
दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन ।यत् पृथिवीं व्युन्दन्ति ॥९
अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम् । अरेजन्त प्र मानुषाः।१०।१६

बारम्बार प्राप्त होने वाली पाप की शक्ति हमारी हिंसा न करे। वह तृण के समान नष्ट हो जाय ।६। वे कान्तिमान् रुद्र के पुत्र मरुद्गण मरुभूमि में भी वायु-रहित वर्षा करते हैं ।७। रम्भाने वाली गौके समान जब बिजली कड़कती है और वर्षा होती है तब बछड़े का पोषण करने वाली गायके समान ही मौन हुई बिजली मरुतों की सेवा करती है ।८। जलवर्षक बादलों मरुद्गण दिन में भी अंधेरा कर देते हैं। उस समय वे भूमि को वर्षा से सींचते हैं ।९। मरुतों की गर्जना से पृथिवी पर बने हुए घर तथा मनुष्य भी काँप जाते है ।१०। (१६)

मरुतो वीलुपाणिभिश् चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ॥११
स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम् । सुसंस्कृता अभीशवः॥१२
अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम् । अग्निं मित्रं न दर्शतम्।१३
मिमीहि श्लोकमास्ये पर्जन्य इव ततनः । गाय गायत्रमुक्थ्यम् ॥१४

वन्दस्व मारुत गणं त्वेषं पनस्युमर्किणम् । अस्मे वृद्धा असन्निह ।१५।१७

हे मरुद्गण ? तुम दृढ़ खुर वाले निरन्तर गति वाले अश्वों-द्वारा उज्ज्वल नदियों की ओर गति करो ।११। हे मरुतो ! तुम्हारी पहिये की हाल, रथ की धुरी और रासें उत्तम हों तथा अश्व स्थिर, बलिष्ठ हों ।१२। मित्र के समान वेद-रक्षक अग्निको साध्य बनाकर स्तुति-वचनों का उच्चारण करो ।१३। अपने मुख से स्तोत्र रचना । मेघ के समान स्तोत्र को बढ़ाओ । शास्त्रानुकूल स्तोत्र का गायन करो ।१४। कांतिमान्, स्तुत्य और स्तुतियों से युक्त मरुतों की स्तुति करो । वे महान् हमारे यहाँ वास करें '१५। (१७)

सूक्त ३८

(षषि—कण्वो घौरः । देवता—मरुतः । छन्द—बृहती)

प्र यदित्था परावतः शोचिर्न मानमस्यथ ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ॥१
स्थिरा वः सन्त्वायुधा पराणुदे वीलू उत प्रतिष्कमे ।
युष्माकमस्तु तविषी यनीयसी मा मर्त्यस्य मायिनः ॥२
परा ह यत् स्थिरं हथ नरो वर्तयथा गुरु ।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ॥३
नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥४
प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ।५।१८

हे कंपाने वाले मरुतो ! जब तुम दूर से धारा के समान, अपने तेज को इस स्थान पर फेंकते हो तब तुम किसके यज्ञ से आकर्षित होते और किसके पास जाते हो ? ।१। हे मरुतो ! तुम्हारे शस्त्र शत्रुओं का नाश करने को स्थिर हों । दृढ़ता पूर्वक शत्रुओं को रोकें । तुम्हारा बल स्तुत्य हो । कपट

करने वालों की हमारे निकट प्रशंसा न हो ।२। हे मरुतो ! तुम वृक्षों को गिराते, पत्थरों को घुमाते और पृथिवी के नये वृक्षों के मध्य से तथा पर्वतोंमें छिद्र करके निकल जाते हो ।३। हे शत्रु-नाशक मरुतो ! आकाश और पृथिवी में तुम्हारा कोई शत्रु नहीं है । हे रुद्र पुत्रो ! तुम मिलकर शत्रुओं के दमनके बल बढ़ाओ ।४। वे मरुद्गण पर्वतों को कम्पित करते, वृक्षों को पृथक्-पृथक् करते हैं। हे मरुतो ! ! तुम मदमत्त के समान प्रजागण के साथ आगे चलो ।५। (१८)

उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥६
आ वो मक्षू तनाय क रुद्रा अवो वृणीमहे ।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥७
युष्मेवितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥८
असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥९
असाम्योजो बिभृथा सुदानवो ऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ।१०।१९

हे मरुतो ! तुमने बिन्दुयुक्त मृगों को रथ में जोड़ा है । लाल मृग सबसे आगे जुड़ा है । पृथिवी तुम्हारी प्रतीक्षा करती है और मनुष्य भयभीत हो गये हैं ।६। हे रुद्र-पुत्रो ! सन्तान की रक्षा के लिए हम आपकी स्तुति करते हैं । जैसे तुम पूर्वकाल में रक्षा के लिए आये थे, वैसे ही भयभीत यजमान के पास आओ ।७। हे मरुतो ! तुम्हारे द्वारा सहायता-प्राप्त या किसी अन्य द्वारा उकसाया हुआ शत्रु हमारे सामने आये तों तुम उससे अपने बल, तेज और रक्षक साधनों-द्वारा दूर हटा दो ।८। हे पूजनीय मेधावी मरुतो ! तुमने कण्व को सम्पूर्ण ऐश्वर्य दिया था । बिजलियों से वर्षा के निमित्त होने के समान समग्त रक्षण-साधनों से युक्त हुए हमको प्राप्त होओ ।९।

हे मङ्गलमय मरुतो ! तुम अत्यन्त तेजस्वी हो । हे कम्पित करने वाले, तुम सम्पूर्ण बलों से युक्त हो । अतः ऋषि से यों वैर करने के प्रति अपनी उग्रता को प्रेरित करो ।१०। (१९)

सूक्त ४०

(ऋषि— कण्वो घौरः । देवता— ब्रह्मणस्पति । छन्द— बृहती ।

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुत, सुदानव इन्द्र प्राशूर्भवा सचा ॥१
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥२
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥३
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इलां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥४
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ।५।२०

हे ब्रह्मणस्पते ! उठो । देवताओंकी कामना करने वाले हम तुम्हारीस्तुति करते हैं । कल्याणकारी मरुद्‌गण हमारे निकट आवें । हे इन्द्र! तुम शीघ्र यहाँ आओ ।१। हेबल के पुत्र ब्रह्मणस्पते ! धनी होने पर मनुष्य सुन्दर घोड़ों और बल से युक्त ऐश्वर्य को प्राप्त करता है ।२। ब्रह्मणस्पति हमको प्राप्तहों । प्रिय सत्यरूप वाणी हमको प्राप्त हो। देवगण पञ्च हवि से युक्त हमारे यज्ञ में मनुष्यों के हित के लिए आवें ।३। ऋत्विज को उत्तम धन देने वाला यजमान अक्षय प्राप्त करता है । उसके लिए लिए हम शत्रु (हिंसक) के द्वारा न मारी जाने वाली इड़ा को यज्ञ में बुलाते हैं।४। ब्रह्मणस्पति ही शास्त्र-सम्मत मंत्र का उच्चारण करतेहैं । उस मंत्रमें इन्द्र,वरुण,मित्र और अर्यमाका वास है।५।(२०)

तमिद् वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद् वामा वो अश्नवत् ॥६
को देवयन्तमश्नवज् जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान् पस्त्याभिरस्थिताऽन्तर्वावत् क्षयं दधे ॥७
उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित् सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ।८।२१

हे देवगण ! सुखकारक, विघ्ननाशक मंत्र का यज्ञ में हम उच्चारण करें। हे पुरुषो यदि उस मंत्ररूप वाणी को चाहते हो तो हमारे सभी सुन्दर वचन तुमको प्राप्तहों।६। देवताओं की कामना करने वालेके पास कौन आवेगा? कुश बिछाने वाले के पास कौन आवेगा ? हविदाता यजमान अन्य मनुष्यों के साथ पशु, पुत्रादि-युक्त घर के लिए चल चुका है ।७। ब्रह्मणस्पति अपने बलको बढ़ाकर राजा के साथ होकर शत्रु का नाश करते हैं। भय के समय सुख देने वाले होते हैं। वे वज्रधारी युद्धों में किसीं से दबते यहीं ।८। (२१)

सूक्त ४१

(ऋषि—कण्वो घौरः । देवता—आदित्यादयः । छन्द—गायत्री)

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नू चित् स दभ्यते जनः ॥१
यं बाहुतेव पिप्रति यान्ति मर्त्यं रिषः । अरिष्टः सर्व एधते ॥२
वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम् । नयन्ति दुरिता तिरः॥३
सुगः पन्था अनृक्षर आदित्यास ऋतं यते । नात्रावखादो अस्ति वः ॥४
य यज्ञं नयथा नर आदित्या ऋजुना पथा ।
प्र वः स धीतये नशत् ।५।२२

उत्कृष्ट ज्ञानी वरुण, मित्र और अर्यमा जिसकी रक्षा करें, उस मनुष्य को कोई नहीं मार सकता ।१। अपने हाथ में विभिन्न धन देते हुए वरुणादि देवगण जिसकी रक्षा करते हैं, उसे कोई शत्रु संतप्त नहीं कर सकता, बल्कि वह सब ओर से बढ़ता है ।२। वरुणादि देवता साधकों के कष्टों का नाश करते, शत्रुओं को मारते और दुःखों को दूर कर देते हैं ।३। हे आदित्यो !

यज्ञ को प्राप्त होने के लिए तुम्हारे मार्ग में कोई कंटक नहीं है। इस यज्ञ में तुम्हारे लिए हवि-रूप भोजन निकृष्ट नहीं है ।४। हे पुरुषो ! जिस यज्ञको सरल विधान से करते हो, वह यज्ञ तुम्हें प्राप्त हो ।५। (२२)

स रत्नं मर्त्यो वसु विश्वं योकमुत त्मना । अच्छा गच्छत्यस्तृतः ॥६
कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः । महि प्सरो वरुणस्य ॥७
मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम् ।
सुम्नैरिद् व आ विवासे ॥८
चतुरश्चिद् ददमानाद् बिभीयादा निधातोः । न दुरुक्ताय स्पृहयेत् ॥९॥२३

हे आदित्यो ! तुम्हारा साधक किसी से पराजित नहीं होता। वह उपभोग्य धन और सन्तानों को प्राप्त करता है ।६। हे मित्रो ! मित्र और अर्यमा के स्तोत्र का हम कैसे साधन करें ? वरुण के हवि-रूप भोजन को किस प्रकार सिद्ध करें ? ।७। हे देवगण ! यजमानकी हिंसा करने के इच्छुक अथवा उसके प्रति कटु वचन कहने वालेकी बात तुमसे नहीं कहता। मैं तो स्तुतियोंसे तुम्हें प्रसन्न करता हूँ ।८। चारों प्रकार के कुकर्म वालों को वश में रखने वाले से डरना चाहिए परन्तु दुर्वचन बोलने वाले को पास न बैठावे ।९। (२३)

सूक्त ४२

(ऋषि—कण्वो घौरः । देवता—पूषा । छन्द—गायत्री)

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् । सक्ष्वा देव प्र णस्पुरः ॥१
यो नः पूषन्नघो वृको दुःशेव आदिदेशति । अप स्म तं पथो जहि ॥२
अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् । दूरमधि स्रुतेरज ॥३
त्वं तस्य द्वयाविनो ऽघशंसस्य कस्य चित् । पदाभि तिष्ठ तपुषिम् ॥४
आ तत् ते दस्र मन्तुमः पूषन्नवो वृणीमहे । येन पितॄनचोदयः ।५।२४

हे पूषन् ! हमको दुःखों से पार लगाओ और हमारे पापों को नष्ट करो। हमारे अग्रगामी बनो ।१। हे पूषादेव ! हिंसक, चोर, जुआं खेलने वाले जो हम पर शासन करना चाहते हैं, उन्हें हमसे दूर कर दो ।२। मार्ग रोकने वाले,

चोरी, लूट करने वाले, कुटिल दस्यु को हमारे मार्ग से हटा दो ।३। हे पूषन् ! तुम पाप को बढ़ावा देने वाले क्रोधी को अपने पैरों से कुचल डालो ।४। हे विकराल कर्म वाले ज्ञानी पूषादेव ! तुम्हारी रक्षा के निमित्त हम स्तुति करते हैं उस रक्षा ने हमारे पूर्व पुरुषों को भी बढ़ाया था ।५। (२४)

अधा नो विश्वसौभग हिरण्यवाशीमत्तम । धनानि सुषणा कृधि ॥६
अति नः सश्चतो नय सुगा नः सुपथा कृणु । पूषन्निह क्रतुं विदः ॥७
अभि सूयवसं नय न नवज्वारो अध्वने । पूषन्निह क्रतुं विदः ॥८
शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् । पूरन्निह क्रतुं विदः ॥९
न पूषणं मेथामसि सूक्तैरभि गृणीमसि । वसूनि दस्ममीमहे ॥१०।२५

हे परम सौभाग्यशाली, स्वर्ण-रथ वाले पूषादेव ! हमारे लिए सुसाध्य धनों को प्राप्त करने की शक्ति दो ।६। क्लेश में पड़े हुए हमको शत्रुओं से दूर ले जाओ । हमकों सरल मार्गावलम्वी बनाओ । हे पूषन्! हमारी रक्षाके लिए बल प्रदानकरो ।७। जहाँ कृषिके उपयुक्त सुन्दर भूमिहो हमको वहाँ ले चलो। मार्ग में कोई नया सङ्कट न आवे । हमारी रक्षा के लिए वलिष्ठ होओ ।८। हे समर्थ पूषन् ! हमको इच्छित धनादि दो । हमको तेजस्वी बनाओ । हमारी उदर-पूर्ति करो ।हमारे लिए बल प्राप्त करो ।९। हम पूषादेवकी निन्दा नहीं, स्तुति कहते हैं । हम उस अद्भुत देव से धन मांगते हैं ।१०। (२५)

सूक्त ४३

(ऋषि–कण्वो घौरः । देवता–रुद्रः मित्रावरुणौ । छन्द–गायत्री, अनुष्टुप्)

कद रुद्राय प्रचेतसे मीह्लुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥१
यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम्॥२
यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥३
गाथपतिं मेधपतिं रुद्रं जलापभेषजम् । तच्छंयोः सुम्नमीमहे ॥४
यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ।५।२६

मेधावी, अभीष्ट-वर्षक, महोली रुद्र के निमित्त किस सुखकारी स्तुति का पाठ करें ।१। जिससे पृथिवी हमारे पशु, मनुष्य, गौ, सन्तान आदि के निमित्त रुद्र-सम्बन्धी ओषधि को उपजावे ।२। जिससे मित्र, वरुण और रुद्र देवता तथा समान प्रीति वाले, अन्य सभी देवता हमसे सन्तुष्ट हों ।३। हम स्तुतियों को बढ़ाने वाले, यज्ञ के स्वामी, सुख-स्वरूप-औषधियों से युक्त रुद्रसे आरोग्य और सुखकी याचना करते हैं ।४। सूर्यकी तरह दमकते हुए, स्वर्ण की तरह चमकते हुए वे रुद्र देवताओं में श्रेष्ठ और ऐश्वर्यों के स्वामी हैं ।५। (२६)

शं नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ॥६
अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम्॥७
हे अश्विद्वय ! तुम्हारा सर्वत्र फैलाहुआ कर्म 'कक्षीवान्'द्वारा प्रशंसा किया गया है। तुमने वेगवान् अश्व के खुर से मनुष्यों के लिए भरपूर जल की वर्षा की।६। हे अश्विद्वय ! तुमने स्तोता 'विश्वक' को उसका पुत्र 'विष्णाप्तु' दिया और पिताके घरपर बूढ़ी होती हुई 'घोषा' को पति प्रदान किया।७। हे अश्विद्वय ! तुमने काले वर्ण वाले कण्व को उज्ज्वल वर्ण वाली बड़े घर की पुत्री पत्नी रूप में प्राप्त करायी। तुमने नृषद के पुत्र को यश दिया। तुम्हारा यह कर्म वर्णन करनेके योग्य है। हे अश्विद्वय ! तुम अनेक रूप धारण करने वाले हो।८। 'पेदु' के निमित्त तुम वेगवान अश्व को लाए जो कभी पीछे न हटने वाला बहुत धन ढोने वाला शत्रुओं के निर्भय जाकर उन्हें मारने में सहायक तथा विजय दिलाने में समर्थ था।९। हे कल्याणकारी अश्विदेवो ! तुम्हारे कर्म श्रवण-योग्य हैं। वेदमन्त्र तुम्हारा स्तोत्र और आकाश-पृथिवी वासस्थान हैं। जब तुम्हें अङ्गिराओं ने बुलाया तब तुम अन्न, बल के साथ आये।१०। (१४)

सू नोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता ।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥११
कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥१२
युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥१३
युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।
युवं भुज्युमर्णसो निः समुद्राद् विभिरूहथुर्ऋज्रेभिरश्वैः ॥१४
अजोहवीदश्विना तौग्र्यो वां प्रोह्लः समुद्रमव्यथिर्जगन्वान् ।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ।१५।१५

हे पालनकर्त्ता ! अश्विदेवो ! पुत्र के समान भक्ति से अगस्त्य ने स्तुति की। स्तुतियों से वृद्धि को प्राप्त हुए तुमने उस मेधावी 'भरद्वाज' को अन्न दिया और 'विश्पला' को स्वस्थ किया।११। हे अश्विद्वय ! 'शयु' के रक्षक

काव्यमय स्तुति से आने वाले तुमने सोने के कलशे के समान गड़े हुए 'रेभ'को दसवें दिन उभारा ।१२। हे अश्विद्वय ! तुमने वृद्ध 'च्यवन' को युवा बनाया। सूर्य की पुत्री ने शोभा से युक्त हो तुम्हारा वरण किया ।१३। हे अश्विद्वय ! तुमको पुरातन स्तोत्र से 'तुग्र' ने स्मरण किया । तुम पक्षी की गति से उड़ने वाले अश्वों द्वारा 'भुज्यु' को समुद्र से निकाल लाये ।१४। हे अश्विदेवो ! 'तुग्र-पुत्र' ने बारम्बार तुम्हारा आह्वान किया । वह समुद्र में बहता हुआ भी पीड़ा में रहता था । उसे अत्यन्त वेगवान् रथ से तुम निकाल लाये ।१५। (१५)

अजोहवीदश्विना वर्तिका वामास्नो यद् सीममुञ्चतं वृकस्य ।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥१६
शतं मेषान् वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा ।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥१७
शुनमन्धाय भरमह्वयत् सा वृकीरश्विना वृषणा नरेति ।
जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥१८
मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः ।
अथा युवाभिदह्वयत् पुरन्धिरागच्छतं सीं वृषणाववोभिः ॥१९
अधेनुं दस्रा स्तर्यं विषक्तामपिन्वतं शयवे अश्विना गाम ।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ।२०।१६

हे अश्विद्वय ! 'वर्तिका' ने तुम्हारा आह्वान किया । तुमने उसे भेड़िया के मुख से निकाला । जीतने वाले रथसे पर्वत पर गये । तुमने 'विष्वा' के पुत्र को विषयुक्त अस्त्र से मार डाला ।१६। हे अश्विद्वय ! वृकी को सौ भेड़ें देने वाले ऋज्राश्व को उसके पिता ने अन्धा बना दिया । तुमने उसे नेत्रदेकर उनमें प्रकाश भर दिया ।१७। वृकीने अन्धे ऋज्राश्व के लिए प्रार्थना की । ऋजाश्व ने अल्हड़पन से अमितव्ययी होकर तरुण जारके समान एक सौ एक भेड़ें काट डाली थीं ।१८। हे अश्विद्वय ! तुम सुख देने में समर्थ हो । अङ्गहीन को अङ्ग देते हो । इसलिए विश्मला ने तुम्हे बुलाया था तब तुमने उसकी रक्षा की थी

।१९। हे अश्विद्वय ! तुमने 'शयु' के लिए बाँझ गाय को दूध से पूर्ण किया। तुमने 'पुरुमित्र' की पुत्री को 'विमद' की स्त्री बनाया ।२०। (१६)

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।
अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥२१
आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्र वोचदृतायन् त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥२२
सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।
अस्मे रयिं नासत्या बृहन्तमपत्यसाचं श्रुत्यं रराथाम् ॥२३
हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम् ।
त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥२४
एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ।२५।१७

हे अश्विद्वय ! तुमने खेत जुतवा कर अन्न उपजा कर, वज्र से दैत्यों को मारते हुए मनुष्यों का परम उपकार किया ।२१। हे अश्विद्वय ! तुमने 'अथर्वा' के पुत्र 'दध्य' के घोड़े का सिर जोड़ा तब उसने इन्द्र से प्राप्त मधु विद्या तुम्हें सिखायी। वह विद्या तुमको अधिक बल देने वाली हुई ।२२। हे अश्विद्वय मैं तुम्हारी दया-बुद्धि की याचना करता हूँ। तुम मेरे कार्यों के रक्षक हो। हमको सन्तान युक्त अनिन्द्य धन प्रदान करो ।२३। हे अश्विद्वय ! तुमने वध्रिमतीको हिरण्यहस्त नामक पुत्र दिया। तुमने तीन टुकड़े हुए 'श्याव' ऋषिको जोड़कर जीवित कर दिया ।२४। हे अश्विदेवो ! तुम्हारे प्राचीन वीर कर्म को पूर्वजों ने कहा। तुम्हारी स्तुति करते हुए सुन्दर और वीर पुत्रादि से युक्त होकर यज्ञ-कर्म में लगाते हैं ।२५। (१७)

सूक्त ११८

(ऋषि—कक्षीवान् देवता—अश्विनौ। छन्द-पंक्तिः, त्रिष्टुप्)

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।
यो मर्त्यस्य मनसो जवीयान् त्रिवन्धुरो वृषणा वातरंहाः ॥१

त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्यन्तं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥२
प्रवद्यामगा सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥३
आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतङ्गाः ।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥४
आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतङ्गा वयो वहन्त्वरुषा अभीके ॥५॥१८

हे अश्विद्वय ! वज्र के समान उड़ने वाला परम ऐश्वर्यवान् तुम्हारा रथ यहाँ आये । वह रथ वायु के समान गति वाला और अत्यन्त वेगवान् है ।१। हे अश्विद्वय ! तुम तीन काष्ठ वाले रथ से यहाँ आओ । हमारी गौओं को दूध वाली करो, घोड़ों को वेगवान् बनाओ और वीरों की उन्नति करो ।२। हे अश्विद्वय ! उतरते हुए रथ से सोम कूटने का शब्द सुनो, तुम्हें पूर्वज दारिद्रय नाश करने वाला कहते हैं ।३। हे अश्विदेवो ! द्रुत वेग वाले घोड़ों युक्त रथ में यहाँ आओ । वे आकाश में उड़ते हुए पक्षी के समान आपको यहाँ लाते हैं ।४। हे अश्विदेवो ! प्रसन्नदाता सूर्य-पुत्री हमारे रथ पर चढ़ी थी । उस रथ को आपके सहित पक्षी रूप अरुण वर्ण के अश्व यहाँ लावें ।५। (१८)

उद् वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।
निष्टौग्र्यं पारयथः समुद्रात् पुनश्च्यवानं चक्रथुर्युवानम् ॥६
युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥७
युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।
अमुञ्चतं वर्तिकामंहसो निः प्रति जंघां विश्पलाया अधत्तम् ॥८
युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम् ।
जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वङ्गम् ॥९

ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमाना: ।
आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम् ॥१०
आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषा: ।
हवे हि वामश्विना रातहव्य: शश्वत्तमाया उषसो व्युष्टौ ।११।१६

हे उग्रकर्मा अश्विदेवो ! तुमने 'वन्दनाका उद्धार किया, 'रेभ' को बचाया, 'तुग्र पुत्र' को समुद्र से निकाला और 'च्यवन' को युवावस्था दी ।६। हे अश्विद्वय ! तुमने जलाते जाते अत्रिको सुख करने वाला अन्न दिया । कण्वकी स्तुति ग्रहणकर उनको नेत्र दिए ।७। हे अश्विदेवो ! प्रार्थी 'शयु की गौको दूध वाली बनाया, 'वर्तिका' का दुःख दूर किया, और 'विश्पला' की जाँघ ठीक की ।८।हे अश्विद्वय ! तुमने 'पेदु'को इन्द्र द्वारा प्रेरित, शत्रु-नाशक विकराल ऐश्वर्यशाली श्वेत अश्व प्रदान किया ।९। हे अश्विद्वय ! हम अपनी रक्षा के लिए तुम्हारा आह्वान करते हैं । तुम हमारी-स्तुतियोंको स्वीकार कर धनयुक्त रथसे हमारे पास आओ ।१०। हे अश्विद्वय ! तुम बाज की चाल से हमारे पास आओ । मैं इस उषाकाल में हवि हाथ में लिए तुम्हारा आह्वान करता हूँ ।११। (१६)

सूक्त ११६

(ऋषि कक्षीवान् दैर्घतमसः । देवता—अश्विनौ । छन्द—जगती, त्रिष्टुप्)

आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥१
ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आ दिशः ।
स्वदामि धर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥२
सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे ।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम् ॥३
युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।
यासिष्टं वर्तिर्वृषणा विजेन्यं दिवोदासाय महि चेति वामवः ॥४
युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम् ।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ।५।२०

हे अश्विद्वय! मैं जीवन धारणके निमित्त तुम्हारे बुद्धिमान्, वेगवान्, उत्तम अश्व वाले, युज्य, ध्वजा युक्त, सम्पत्ति से युक्त रथ को हवियों की ओर आकर्षित करता हूँ ।१। इस रथ के चलनेपर हम ऊपर देखते हैं । सब ओर से स्तुतियां एकत्रित होती हैं । मैं यज्ञ हवि को सुस्वादु बनाता हूँ । ऋत्विज उसकी ओर जाते हैं । हे अश्विद्वय ! तुम्हारे रथ पर सूर्य-पुत्री चढ़ी है ।२। हे अश्विदेवो ! परस्पर ईर्ष्यालु परन्तु प्रसन्न चित्त वाले वीर युद्ध द्वारा यश प्राप्ति के लिए एकत्रित होते हैं । तब तुम्हारा रथ नीचे उतरता जाना जाता है । उसीसे तुम स्तोता वीर के लिए वरणीय धनों को लाते हो ।३। हे अश्विदेवो ! समुद्र की लहरों में समा कर नष्ट-प्राय हुए 'भुज्यु' को तुमने स्वयं जुड़ने वाले अश्वों द्वारा ले जाकर उसके घर पहुँचाया । 'दिवोदास' की जो आपने रक्षा की वह प्रसिद्ध ही है ।४। हे अश्विद्वय ! तुम्हारे सुन्दर अश्वों ने स्वयं जुतकर शोभित रथ को उचित स्थान पर पहुँचाया । सूर्या ने मैत्री भाव के निमित्त आकर तुम मेरे पति हो कहकर तुम्हें वरण किया ।५। (२०)

युवं रेभं परिषूतेरुरुष्यथो हिमेन धर्मं परितप्तमत्रये ।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तार्यायुषा ॥६
युवं वन्दनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।
क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत् ॥७
अगच्छतं कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितम् ।
स्वर्वतीरित ऊतीर्युवोरह चित्रा अमीके अभवन्नभिष्टयः ॥८
उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥९
युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ।१०।२१

हे अश्विद्वय ! तुमने 'रेभ' की रक्षा की । 'अत्रि' के लिए अग्निको शीतल जल से शान्त किया । 'शयु' की गौ को पयस्विनी बनाया और 'वन्दन' को दीर्घायु प्रदान की ।६। हे अश्विद्वय ! तुमने अपनी कुशलतासे 'वन्दन' के जीर्ण

हुए शरीर को रथ के समान ठीक किया। स्तुतियों से प्रसन्न हुए तुम गर्भस्थ शिशु को भी मेधावी बनाते हो। तुम्हारा कर्म यजमान की रक्षा करे।७। हे अश्विदेवो ! दूर देशमें रुदन करते हुए 'भुज्यु'के पास तुम गये। तुम्हारी दिव्य रक्षाओंने वहाँ आश्चर्यजनक कार्य किया।८।उस मधुर-मक्षिकाने मधुर आलाप से तुम्हारी स्तुति की। 'कक्षीवान्' ने सोम के आनन्द में तुम्हे पुकारा। तुमने 'दध्य' के मनको आकर्षित कर उस पर रखे घोड़े के सिर से मधु विद्या की शिक्षा ली।९। हे अश्विदेवो ! तुमने 'पेदु'के लिए संग्राम विजेता, कुशल,बहुतों द्वारा कामना योग्य शत्रुओं को वशीभूत करने में इन्द्र के तुल्य- श्वेत रङ्ग का अश्व का प्रदान किया।।१०। (२१)

सूक्त १२०

(ऋषि—उशिक् पुत्रः कक्षीवान्। देवता—अश्विनौ। छन्द—गायत्री; उष्णिक्, अनुष्टुप्।)

का राधद्धोत्राश्विना वां को वां जोष उभयोः।
कथा विधात्यप्रचेताः ॥१

विद्वांसाविद् दुरः पृच्छेदविद्वानित्थापरो अचेताः।
नू चिन्नु मर्ते अक्रौ ॥२

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वीचेतमद्य।
प्रार्चद् दयामानो युवाकुः ॥३

वि पृच्छामि पाक्या न देवान् वषट्कृतस्याद्भुतस्य दस्रा।
पातं च सह्यसो युवं च रभ्यसो नः ॥४

प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वाम्।
प्रैषयुर्न विद्वान् ।५।२२

हे अश्विदेवो ! तुम किस स्तुति को चाहते हो ? तुम्हें कौन प्रसन्न कर सकता है ? एक अज्ञानी व्यक्ति तुम्हारी साधना किस प्रकार करे? ।१। अज्ञानी मनुष्य इन विद्वानों से ही स्तुति और पूजा के ढङ्गों का ज्ञान प्राप्त करे। इन अश्विनोकुमारों के सामने सभी अज्ञानी है। मनुष्यों पर ये शीघ्र कृपा करते

हैं ।२। हे अश्विद्वय ! हम विद्वानों का ही आह्वान करते हैं । हमको स्तुति योग्य मन्त्र बताओ । तुमको हवि देने वाला अत्यन्त भक्तिसे नमस्कार करता है ।३। हे अश्विद्वय ! मैं बालक के समान देवगण से यज्ञके सम्बन्ध में जिज्ञासा करता हूँ । अधिक बलवान और भयङ्कर व्यक्ति से तुम हमारी रक्षा करो ।४। तुम्हारी स्तुति रूप वाणी 'भृगु'के समान आचरण वाले 'घोषा'के पुत्र में सुशोभित हुई, जिसके द्वारा पज्रवंशी तुम्हारा स्तवन करता है । यह वाणी अत्यन्त ज्ञान से भरी हुई हो ।५। (२२)

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम् ।

आक्षी शुभस्पती दन् ॥६

युवं ह्यास्तं महो रन् युवं वा यन्निरततंसतम् ।

ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥७

मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः ।

स्तनाभुजो अशिश्वीः ॥८

दहीयन् मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै ।

इषे च नो मिमीतं धेनुमत्यै ॥९

अश्विनोरसनं रथमनश्वं वाजिनीवतोः तेनाहं भूरि चाकन ॥१०

अयं समह मा तनूह्याते जनाँ अनु । सोमपेयं सुखो रथः ॥११

अध स्वप्नस्य निर्विदेऽभुञ्जयतश्च रेवतः । उभा ता बस्रि नश्यतः॥१२॥२३

हे अश्विदेवो ! तुम एक मेरी स्तुति श्रवण करो । मैंने तुम्हारी ही स्तुति की है । तुम अन्धों को नेत्रदान करते हो, मेरा भी मनोरथ पूर्ण करो ।६। हे अश्विद्वय ! तुम विस्तृत धन देते हो । हमारी रक्षा करो और पाप कर्म वाले चोरों से बचाओ ।७। हे अश्विदेवो ! तुम हमको शत्रु से पराजित न कराओ । हमारी दूध वाली गौएँ बछड़े से न बिछड़ें और अन्य स्थान को प्राप्त न हों ।८। हे अश्विद्वय ! तुम्हारे उपासक मित्रोंके लाभार्थ तुमसे याचना करें । तुम हमें बल और धन से युक्त करो । गौओ और अन्नों की प्राप्ति की सामर्थ्य दो ।९। मैंने अश्विनीकुमारों से बिना घोड़ों के चलने वाले रथ को अन्न सहित

प्राप्त किया है मैं उसके द्वारा महान् ऐश्वर्य प्राप्ति की आशा करता हूँ ।१०। हे धनयुक्त रथ ! मुझे बढ़ा । यह सुखकारी रथ सोम पीने योग्य स्थानों में पहुँच कर मनुष्योंको प्राप्त होता है ।११। प्रातः कालीन स्वप्न और सम्पदाका उपभोग न करने वाले धनिक दोनों ही प्रकार से उपेक्षा के पात्र हैं। ये शीघ्र ही नष्ट हो जाते हैं ।१२। (२३)

सूक्त १२१ [अठारहवाँ अनुवाक]

(ऋषि–औशिजः कक्षीवान् । देवता–विश्वेदेवा इन्द्रश्च । छन्द–पंक्तिः, त्रिष्टुप्)

कदित्था नृं॒ःपात्रं देवयतां श्रवद् गिरो अङ्गिरसां तुरण्यन् ।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः ॥१
स्तम्भीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥२
नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून् ।
तक्षद् वज्रं नियुतं तस्तम्भद् द्यां चतुष्पदे नर्याय द्विपादे ॥३
अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम् ।
यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥४
तुभ्यं पयो यत् पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।
शुचि यत् ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ।५।२४

मनुष्यों के रक्षक इन्द्रदेव भक्त अङ्गिराओं की प्रार्थना कब सुनेंगे ? ये जब गृहस्थ यजमान के समस्त यज्ञकर्त्ताओं को अपने सब ओर देखेंगे तब अत्यन्त उत्साह पूर्वक शीघ्रता से प्रकट होंगे ।१। मेधावी वीर पुरुष ने आकाश को धारण किया, अन्न के निमित्त गौओं को पुष्ट किया और धन के लिए पृथिवी को खींचा । उसने अपनी महानता से उत्पन्न प्रजाओं पर कृपा की । अश्व (सूर्य) की स्त्री को पृथिवी माता बनाया।।२। उषाओं के स्वामी इन्द्र अंगिराओं के आह्वान पर-नित्य जाते थे। उन्होंने हननशील वज्र बनाया और दुपाये, चौपायों के लिए आकाश को धारण किया ।३। हे इन्द्र !

तुमने इस सोमसे पुष्ट होकर गौओंका समूह सचमुच दान किया। जब तुम्हारा त्रिकोण वज्र शत्रुओं का हनन करता हैं, तब मनुष्यों को दुःख देने वाले पाणि के द्वारों को गौओं के निकलने लिए खोल देता है।४। शीघ्र कार्य करने वाले इन्द्र के लिए माता-पिता आकाश और पृथिवी उत्पादन शक्ति युक्त बलप्रद दुग्ध लाये थे। उस समय अमृत रूप दुग्ध वाली गौ का दूध रूप धन तुमको भेंट किया था।५। (२४)

अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः।
इन्दुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिञ्चञ्जरणाभि धाम ॥६
स्विध्मा यद् वनधितिरपस्यात् सूरो अध्वरे परि रोधना गोः।
यद्ध प्रभासि कृत्व्याँ अनु द्यूनर्विशे पश्विषे तुराय ॥७
अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम्।
हरिं यत् ते मन्दिनं दुक्षन् वृधे गोरभसमद्रिभिर्वाताप्यम् ॥८
त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा।
कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनन्तैः परियासि वधैः ॥९
पुरा यत् सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य।
शुष्णस्य चित् परिहितं यदोजो दिवस्परि सुग्रथितं तदादः।१०।२५

तब द्रुतगामी सूर्य रूप इन्द्र उषा के समीप प्रकाशित हुए। यह शत्रु-विजयी हमको प्रसन्न करें। जैसे चमकती हुई हवियोंसे स्रवा के द्वारा सिंचन करता हुआ सोम साधकों के हृदयों को प्राप्त होता है।६। हे इन्द्र ! विद्वानों के यज्ञ में इन्द्रियों को निग्रह करने वाला तेज चमकता है। गाड़ीवान्, पशु-रक्षक और शीघ्रता से कार्य कर वाले सभी प्राणी अपने कर्मों को करते हैं, वह तुम्हारे किरण-दान का ही प्रतिफल हैं।७। हे इन्द्र ! प्रकाश को छिपाने वाले कूप का खण्डन करने के लिए तुम विशाल आकाशसे आठ घोड़ों को लाये। उस समय साधकों ने तुम्हारे निमित्त दूध में भीगे हुए हुए सोमका रस पाषाणों से कूटा।८। बहुतों द्वारा आहूत इन्द्र ने त्वष्टा द्वारा प्रयुक्त लौह-वज्र कों चर्म द्वारा आकाश से फेंका। उस समय शुष्ण को अस्त्रों से घेर कर कुत्स की रक्षा की (वज्र को फेंकते समय चमड़े के दस्ताने पहन लिये जाते

हैं।) ।६। हे वज्रिन ! सूर्य के अन्धकार में विलीन होने से पूर्व ही वृत्र की ओर वज्र छोड़ों। आकाश के ऊपर "शुष्ण" (अनावृष्टि रूपी दैत्य) का जो अभेद्य बल है, उसे भेद डालो।१०। (२५)

अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।
त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥११
त्वमिन्द्र नर्यो याँ अवो नॄन् तिष्ठा वातस्य सुयुजो वहिष्ठान् ।
यं ते काव्य उशना मन्दिनं दाद् वृत्रहणं पार्यं ततक्ष वज्रम् ॥१२
त्वं सूरो हरितो रामयो नॄन् भरच्चक्रमेतशो नायमिन्द्र ।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥१३
त्वं नो अस्या इन्द्र दुर्हणाया: पाहि वज्रिवो दुरितादभीके ।
प्र नो वाजान् रथ्यो अश्वबुध्यानिषे यन्धि श्रवसे सुनृतायै ॥१४
मा सा ते अस्मत् सुमतिर्वि दसद् वाजप्रमहः समिषो वरन्त ।
आ नो भज मघवन् गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ।१५।२६

हे इन्द्र ! महान् आकाश और पृथिवी तुम्हारे वृत्र-वध के कार्य से अत्यन्त पुष्ट हुए हैं। तुमने उस वाराह के समान वृत्र को अपने घोर वज्र से मारकर जल-शायी कर दिया ।११। हे इन्द्र ! तुम जिन मनुष्यों का हित करने वाले घोड़ों का पालन करते हो, उस पर चढ़ो। कवि के पुत्र 'उशना' ने वृत्रनाशक वज्र तुम्हें दिया था, उसे तीक्ष्ण करो।१२। हे इन्द्र ! तुमने सूर्यके स्वर्णिम अश्व को रोक दिया। वह रथ के पहिए को न चला सका। तुमने अताज्ञिको और राक्षसों को नब्बे नदियोंके पार फेंक दिया।१३। हे वज्रिन ! तुम इस निकट-वर्ती दारिद्रय रूप पापसे हमारी रक्षा करो। अन्न, यश, प्रिय एवं सत्यवाणी, रथ, अश्व आदि हमको प्रदान करो।१४। हे बलों के कारण भूत प्रतापी, ऐश्-वर्यवान् इन्द्र ! तुम्हारी जो दया-बुद्धि हमारी और है वह न्यून न हो हमारे पास खूब अन्न रहे। हमारी गौएं प्रदान करो हम तुम्हारी स्तुति करते हुए अत्यन्त प्रसन्नता और तुष्टि प्राप्त करें।१५। (२६)

अष्टमोऽध्याय: समाप्त:

प्रथमोऽष्टक: समाप्त:

द्वितीय अष्टक

(प्रथम अध्याय)

सूक्त १२२ [प्रथम अनुवाक]

(ऋषि–कक्षीवान । देवता–विश्वेदेवा । छन्द–पंक्तिः, त्रिष्टुप्)

प्र वः यान्तं रधुमन्यवोऽन्धो यज्ञं रुद्राय मीह्लुषे भरध्वम् ।
दिवो अस्तोष्यसुरस्य वीरै रिषुध्येव मरुतो रोदस्योः ॥१
पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥२
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरि स्यन्तु देवाः ॥३
उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥४
आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे ।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ।५।१

हे द्रुतगामी मरुद्गण हम रुद्र के निमित्त अन्नरूप हविदान करते हैं । मैं उन आकाशके वीरोंके सहित उनकी स्तुति करता हूँ । वे आकाश और पृथिवी के वीरों के समान अस्त्र धारण कर शत्रुओं को निरस्त करते हैं ।१। पति के बुलाने पर पत्नी शीघ्र उपस्थित होती है वैसे ही अहोरात्र देवता हमारे प्रथम आह्वान पर पधारें । रात्रि धूम्र वर्ण के वस्त्र वाली है और उषा सूर्य की

किरणों से युक्त अत्यन्त सुन्दर दिखाई पड़ती है ।२। दिन वाला गतिमान सूर्य हमको प्रसन्नता देने वाला हो । जल वर्षक वायु हमको आनन्द प्रद हो । इन्द्र और पर्वत हमको उत्साहित करें । विश्वेदेवा हमको धन दान करें ।३। हे ऋत्विजो ! मुझ उशिज पुत्रके लिए हवि भक्षक और स्तुत्य अश्वनीकुमारों का आह्वान करो । हे मनुष्यो ! तुम जलोंके पुत्र की पूजा करो और स्तौताओंकी मातृ भूमि पृथिवी और आकाशका भी स्तवन करो ।४। हे मनुष्यो ! मैं उशिज पुत्र कक्षीवान गर्जनशील इन्द्रका तुम्हारे लिए आह्वान करताहूँ । घोषा नामक नारी ने रोग निवृत्ति के लिए अश्विद्वय का आह्वान किया, वैसे मैं भी करता हूँ । मैं दानशील पूषा की स्तुति करता हुआ अग्नि सम्बन्धी धनों की याचना करता हूँ ।५।

(१)

श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ।।६
स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे ।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन् ।।७
अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।
जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः ।।८
जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक ।
स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ।।९
स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति बाह्लसृत्वा विश्वासु पृत्सु सदमिच्छूरः ।१०।२

हे मित्र और वरुण ! मेरी पुकार सुनो । यज्ञ-गृह तथा चारों ओर से मेरे आह्वान पर ध्यान दो। हमारे खेतों में जल-वर्षक देव वर्षा करें ।६। हे मित्र-वरुण ! मैं तुम्हारी स्तुति करता हूँ । तुम मुझ पज्रवंशी को सौ गायें दो । सुन्दर रथ में बैठकर शीघ्र यहाँ आओ और मुझे पुष्ट करो ।७। मैं इन महान् वैभवशाली देवों की स्तुति करता हूँ । हम मनुष्य इस सुन्दर धन का उपभोग करें । वे देवता अङ्गिराओं को बहुत अन्न प्रदान करते और मुझे

अश्व-रथादि युक्त धन देते हैं ।८। हे मित्र वरुण ! जो द्रोही कुटिलता पूर्वक तुम्हारे लिए सोम निष्पन्न नहीं करता, वह अपने हृदय में यक्ष्मा रोग धारण करता है । जो नियम पूर्वक रहता हुआ तुम्हारी स्तुतियाँ करता हुआ सोम तैयार करता हैं वह तुम्हारा कृपा पात्र होता है ।९। वह व्यक्ति दानवान्, बलवान्, उत्तम यश वाला, त्यागी होता हुआ शत्रुओं को परास्त करता है और विकराल मनुष्यों से भी नहीं डरता ।१०। (२)

अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥११
एतं शर्धं धाम यस्य सूरेरित्यवोचन् दशतयस्य नंशे ।
द्युम्नानि येषु वसुताती रारन् विश्वे सन्वन्तु प्रभृथेषु वाजम् ॥१२
मन्दामहे दशतयस्य धासेर्द्विर्यत् पञ्च बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन् ॥१३
हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ॥१४
चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः
रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ।१५।३

हे हर्षदाता, अविनाशी देवताओ ! स्तोमाको आह्वान सुनो । तुम आकाश में वेग से चलते हुए आकर पुकारने वाले को महत्वपूर्ण धनों को देते हो ।११। "जिस स्तोताने दस चमसोंमें रखे हुए सोम के निमित्त हमारा आह्वान किया है, उसके लिए बल धारण करेंगे" देवताओंने ऐसा कहा । इन देवताओं में यश और धन शोभा पाते हैं । ये देव हमारे यज्ञों में अन्न सेवन करें ।१२। ऋत्विज दश चमसों से रखे सोम-रूप अन्न से पुष्ट करते चलते हैं । अभीष्ट अश्व और अभीष्ट रासों वाले मनुष्य क्या स्वयं सामर्थ्य वाले हैं ? वे देव ही इन मनुष्यों को और इनके विजयशील घोड़ों को प्रेरित करते हैं ।१३। विश्वेदेवा हमको कानों में स्वर्ण ग्रीवा में मणि पहनने वाले सुशोभित पुत्र को देने की इच्छा करें । उषा काल में स्तुति और हव्य को ग्रहण करें ।१४। हे मित्र वरुण !

'मशर्शार' राजा के चार और 'आयवस' राजा के तीन बालक घोड़े मिले हैं। तुम्हारा अति सुन्दर सुशोभित रथ सूर्य के समान चमकता है ।१५।   (३)

सूक्त १२३

(ऋषि–दीर्घतमस: कक्षीवान् । देवता–उषा । छन्द–त्रिष्टुप्)

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः ।
कृष्णादुदस्थादर्या विहायाश्चिकित्सन्ती मानुषाय क्षयाय ॥१
पूर्वा विश्वस्माद् भुवनादबोधि जयन्ती वाजं बृहती सनुत्री ।
उच्चा व्यख्यद् युवतिः पुनर्भू रोषा अगन् प्रथमा पूर्वहूतौ ॥२
यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥३
गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना ।
सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद् भजते वसूनाम् ॥४
भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व ।
पश्चा स दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ।५।४

दक्षिणा की ओर उषा का रथ जुड़ गया । अमर देवता इसपर चढ़ गये । रोगोंका नाश करने वाली उषा आकाश से उठ पड़ी ।१। धन को जीतने वाली उषा सबसे पहिले जागी । वह युवती है, बार-बार प्रकट होती है । हमारे आह्वान पर यह सबसे पहले आती है ।२। हे उत्तम प्रकार से उत्पन्न उषे ! तुम मनुष्यों को प्रकाश या अन्न का भाग देती हो । दान के प्रेरक देव, सूर्योदय होने पर हमको पाप-रहित मान कर स्वीकार करें ।३। नित्य प्रति उषा अपने महान रूप से प्रत्येक घर में जाती है । वह कांतिमती सदा धन देने की इच्छा करती हुई श्रेष्ठ धनों को बाँटती है ।४। हे दयामयि उषे ! तुम भग (सूर्य) की बहन और वरुण की पुत्री हो । तुम स्तुति की ध्वनि सुनो । पापियों को पीछे धकेल दो, उन्हें हम तुम्हारे द्वारा प्रेरित रथ से पराजित करें ।५।   (४)

उदीरतां सूनृता उ पुरन्धीरुदग्नयः शुशुचानासो अस्थुः ।

स्पार्हा वसूनि तमसापगूह्लाविष्कृण्वन्त्युषसो विभातीः ॥६
अप॑न्यदेत्यभ्यन्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ।
सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम ।
अनवद्यास्त्रिंशतं योजनान्यकैका क्रतु॑ परि यन्ति सद्यः ॥८
जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची ।
ऋतस्य योषा न मिनाति धामाहरर्हनिष्कृतमाचरन्ती ॥९
कन्येव तन्वा शाशदानाँ एषि देवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ।१०।५

हमारे मुख स्तुति गावें, बुद्धियाँ उन्मुख हों, प्रदीप्त अग्नि वृद्धि को प्राप्त हों । अत्यन्त कान्ति वाली उषा अन्धकार में छिपे हुए धन को प्रकट करें ।६। एक के हटने पर दूसरा आता है । भिन्न-भिन्न रूप वाले रात और दिन गतिशील हैं । एक सब पदार्थों को छिपाता और दूसरा प्रकाशवान रथ द्वारा प्रकट करता है ।७। उषा जैसी आज हैं, कल भी वैसी ही थी । यह वरुण के स्थान में बहुत दूर तक वास करती है । यह तीसों दिन आकाश की परिक्रमा करती रहती है तथा प्रतिदिन अपने नियत स्थान को प्राप्त होती है ।८। दिन के आरम्भिक काल को जानती हुई अन्धकारसे चमकती हुई उषा उत्पन्न हुई है । यह युवती प्रतिदिन नियत स्थान पर पहुँच जाती है तथा नियम का उल्लंघन कभी नहीं करती ।९। हे देवी ! तुम कन्याके समान अपने शरीर को विकसित कर प्रकाशवान सूर्य को प्राप्त होती हो । फिर युवती की तरह कांतिमती तुम मुस्कराती हुई हृदय-देश को खोल देती हो ।१०।   (५)

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।
भद्रा त्वमुषो वितरं व्युच्छ न तत् ते अन्या उषसो नशन्त ॥११
अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य ।
परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः ॥१२

ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि ।
उषो नो अद्य सुहवा व्युच्चास्मासु रायो मघवत्सु च स्युः ।१३।६

हे उषे ! माता द्वारा उबटन कर स्वच्छ की हुई कन्या के समान रूपवती तुम अपने शरीर को दिखाती हो । हे कल्याणकारिणी ! दूर तक प्रकाशित होओ । विगत उषाएँ अब तुम्हारी कांतिको प्राप्त नहीं करेंगी ।११। अश्व,गौ से युक्त वरणीय सूर्य की किरणों से स्पर्द्धा वाली उषाएँ कल्याणकरी रूपों को धारण करती हुई चली आतीं और लौट लौटकर जाती हैं।१२। हे उषा ! ऋतु की डोरीके अनुकूल चलती हुई हमें सुमति प्रदान करो । हम तुम्हारा आह्वान करते हैं । तुम आकाश से भूःलोक को भर दो और हमको धन प्रदान करो ।१३। (६)

सूक्त १२४

(ऋषि—कक्षीवान् दैर्घतमसः । देवता—उषा । छन्द—त्रिष्टुप्)

उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं प्रासावीद द्विपत् प्र चतुष्पदित्यै ॥१
अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणामुपमा शश्वतीनामायातीनां प्रथमोषा व्यद्यौत् ॥२
एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥३
उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।
अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात् पुनरेयुषीणाम् ॥४
पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुम् ।
व्यु प्रथते वितरं वरीय ओभा पृणन्ती पित्रोरुपस्था ।५।७

अग्नि के प्रदीप्त होने, उषा के आविर्भूत होने और सूर्य के उदय होने पर विस्तृत आकाश फैल गया । फिर सविता देव ने दुपायों और चौपायों को कर्मों में प्रेरित किया ।१। देव नियमों में अदय मनुष्यों को क्षीण करने वाली

निरन्तर विमल होती हुई उषा साकार हुई । भविष्य में आने वाली उषाओं में वह प्रथम उषा मुस्कारा रही है ।१। ज्योतिर्मय वसन धारण किये यह आकाश की पुत्री अकस्मात् सामने आगयी । यह नियमों में दृढ़ रहती हुई सब दिशाओं को जानती है और उन्हें विनष्ट नहीं होने देती ।३। जैसे सूर्य अपना वक्ष:स्थल दिखाते हैं, नोधा अपनी प्रिय वस्तुओं को बताते हैं, वैसे ही उषा ने अपने को प्रकट किया है । गृहस्थ पत्नी सर्व प्रथम जागती और फिर सबको जगाती है, उषा भी उसी के समान बर्तती है ।४। गवादि को उत्पन्न करने वाली उषा ने अन्तरिक्ष के मध्य में ध्वजा रूप तेजको प्रकट किया । वह आकाश पृथिवी रूप माता-पिता की गोद को भरती हुई सर्वत्र फैलती है ।५। (७)

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा शाशदाना नार्भादीषते न महो विभाती ॥६
अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥७
स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ।
व्युच्छती रश्मिभिः सूर्यस्याञ्ज्यङ्क्ते समनगा इव व्राः ॥८
आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥९
प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु ।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत् स्तोत्रे सूनृते जारयन्ती ।१०।८

प्रत्यक्षमें महान यह उषा अपने पराये का ध्यान रखे बिना सभी को प्राप्त होती है । वह पाप रहित शरीर से बढ़ती हुई छोटे या बड़े किसी से भी नहीं हटती ।६। बिना भाई की बहिन के समान उषा पश्चिम की ओर मुख करके चलती है । धन प्राप्तिके लिए रथारूढ़ होने वालेके समान विजयिनी बनी हुई सुन्दर वस्त्र पहिन कर शोभायुक्त नारीके समान अपना स्वरूप दिखाती है ।७। रात्रि रूप बहन अपनी बड़ी बहन उषा के लिए स्थान छोड़ती हुई हटती है ।

उत्सव में जाने वाली नारियों के समान उषा सूर्य रश्मियों से अपनेको सजाती है ।८। इन सब बहन रूपिणी उषाओं में पहली दूसरेके पीछे पीछे नित्य चलती है । उन प्राचीन उषाओंके समान नवीन उषा प्रकट होकर हमकोधनों से युक्त करें ।९। हे धनवती उषे ! दानशीलों को चैतन्य करो, लोभीजन सोते रहें । तुम मनुष्यों की आयु क्षय करने वाली मनुष्योंको धनसे युक्त करो और स्तोता के लिए धन वाली होकर फैलो ।१०। (८)

अवेयमश्वैद् युवतिः पुरस्ताद् युङ्क्ते गवामरुणानामनीकम् ।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ।।११
उत् ते वयश्चिद् वसतेरपप्तन् नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ।।१२
अस्तोढ्वं स्तोम्या ब्रह्मणा मे ऽवीवृधध्वमुशतीरुषासः ।
युष्माकं देवीरवसा सनेम सहस्त्रिणं च शतिनं च वाजम् ।१३।९

यह युवती पूर्व दिशा से उतर रही है । इसके रथ में अरुण बैल जुते हैं । जब यह मुसकरायेगी तब इसका प्रकाश फैलेगा औप घर-घर में अग्नि प्रदीप्त होगी ।११। हे उषे ! तुम्हारे खिलते ही पक्षी भी घोंसला छोड़ देते हैं । मनुष्य भी अन्न के लिए कर्म करने लगते हैं । तुम हविदाताको अत्यन्त धन देने वाली हो ।१२। हे स्तुति-पात्र उषाओ ! मेरे स्तोत्र तुम्हारी स्तुति करें । तुम वृद्धिको प्राप्त होओ और तुम्हारे रक्षा साधनों पर निर्भर रहते हुए हम असंख्य धन प्राप्त करें ।१३। (९)

सूक्त १२५

(ऋषि–कक्षीवान् दैर्घतमसः । देवता-स्वनयस्य दानस्तुतिः । छन्द–त्रिष्टुप् जगती)

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान् प्रतिगृह्या नि धत्ते ।
तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ।।१

सुगुरसत् सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्वायन्तं वसुना प्रातरित्वा मुक्षीजयेव पदिमुत्सिनाति ॥२
आयमद्य सुकृत प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥३
उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥४
नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥५
दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥६
मा तृणन्तो दुरितमेन आरन् मा जारिषुः सूरयः सुव्रतासः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृ णन्तमभि सं यन्तु शोकाः ।७।१०

दान शील व्यक्ति प्रातःकाल होते ही धन दान करता है, विद्वान् उसे ग्रहण करते हैं । वह उस धनसे सन्तान, आयु और बल युक्त हुआ रक्षित होता है ।१। वह असंख्य गौ, घोड़े, स्वर्णसे युक्त होता है । इन्द्र उस दानीको महान सातथ्र्य देते हैं । वे प्रातः काल ही आकर धनों से उसे समृद्ध कर देते हैं ।२। मैं आज शोभन कर्म वाले यज्ञ को देखने के लिए रथ पर चढ़कर आ गया । हे यजमान तू बालकों के स्वामी इन्द्र को हर्षदायक सोम निचोड़कर पिला और स्तुतिगान से उन्हें प्रसन्न कर ।३। कल्याण-कारिणी गौ-रूप नदियाँ यज्ञ की इच्छा करने वाले यजमान के निकट प्रवाहित होती हैं । यज्ञ की इच्छा करने वाले दानी को घृत की धारायें सब ओर से प्राप्त होती हैं ।४। दानी का स्वर्ग मे भी सत्कार होता है । वह देवताओं में पहुँचता है । नदियां उसके लिए जल रूप घृत प्रवाहित करती हैं । उसकी दी हुई दक्षिणा सदा बढ़ती रहती है ।५। दानियों के पास विभिन्न ऐश्वर्य हैं । दानी के लिये ही आकाश में सूय स्थित है । दानी अपने दान-रूप अमृत से ही दीर्घायु प्राप्त करता है ।६। दानी दुःख नहीं पाता । उसे पाप नहीं घेरता । नियमों में दृढ़ रतोता क्षीण नहीं होता ।

उनसे भिन्न व्यक्ति ही पाप के शिकार होते हैं। सब शोक दान-हीन को ही प्राप्त होते हैं।७। (१०)

सूक्त १२६

(ऋषि—कक्षीवान् । देवता—विद्वांसः । छन्द—त्रिष्टुप् अनुष्टुप्)

अमन्दान् त्स्तोमान् प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥१
शतं राज्ञो नाधमानस्य निष्कान्छतमश्वान् प्रयतान् त्सद्य आदम् ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥२
उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः ।
षष्टिः सहस्रमनु गव्यमागात् सनत् कक्षीवाँ अभिपित्वे अह्नाम् ॥३
चत्वारिंशद् दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति ।
मदच्युतः कृशनावतो अत्यान् कक्षीवन्त उदमृक्षन्त पज्राः ॥४
पूर्वामनु प्रयतिमा ददे वस्त्रीन् युक्ताँ अष्टावरिधायसो गाः ।
सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः । ५
आगधिता परिगधिता या कशीकेव जङ्गहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६
उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ।७।११

मैं सिन्धु नदीके तट पर वास करने वाले राजा भाव्य के लिए बुद्धि द्वारा स्तोत्र भेंट करता हूँ। उस राजा ने यश की इच्छा से मेरे निमित्त सहस्र यज्ञानुष्ठान किए हैं।१। मुझ कक्षीवान् से भेंट करते हुए राजा ने सौ स्वर्ण हार सौ सुन्दर अश्व और सौ गायें ग्रहण की। उस राजा का यश आकाश तक फैल रहा है।२। स्वनय के दिये हुए विभिन्न वर्णों के अश्व और दशरथ मुझे प्राप्त हुए। साठ हजार गौयें भी मिली, जिन्हें मुझ कक्षीवान् ने ग्रहण कर अपने पिता को भेंट कर दिया।३। हजार गौओं की कतार के

आगे दश रथ चले आए। स्वर्णभूषणों से युक्त अश्वों को कक्षीवान् के पुत्र मिलने लगे।४। हे पज्रवंशियो ! मैं प्रथम दान के अनुसार तुम्हारे लिये तीन जुते हुये रथ और साठ उत्तम गायें लाया हूँ। कुटुम्ब वाले पज्रवंशी लोग शकट से युक्त होकर यश के इच्छुक हों।५। मेरी पत्नी सहस्वामिनी के रूपसे मुझ (स्यनज राजा) को सैकड़ों प्रकार के भोग्य पदार्थ और ऐश्वर्य प्रदान करती है। वह मेरी अत्यन्त प्रेम रखने वाली सहधर्मिणी है।६। (पत्नी कहती है) मुझे पास आकर स्पर्श करो। मुझेअल्प रोम वाली न समझो। मैं गाँधारी के समान रोम वाली अवयवों से पूर्ण हूं। (पत्नी कहती है) हे प्रियतम ! तू मेरे समस्त अङ्गों का निरीक्षण कर, मेरे गुण अवगुण पर पूर्ण रूप से विचार कर। तुम मेरे अङ्गों, गुणों और गृह कार्यों को तनिक भी हानि कारक न पावोगे।७। (११)

सूक्त १२७

(ऋषि—परुच्छेपः। देवता—अग्निः। छन्द—अत्यष्टिः, अतिधृतिः।)

अग्नि होतारं मन्ये दास्वन्तं वसु सूनुं
सहसो जातवेदसं विप्रं न जातवेदसम्।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषा जुह्वानस्य सर्पिषः ॥१
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां
विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः।
परिज्मानमिव द्यां होतारं चर्षणीनाम्।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥२
स हि पुरू चिदोजसा विरुक्मता दीद्यानो
भवति द्रुहंतरः परशुर्न द्रुहंतरः।
वीलु चिद् यस्य समृतौ श्रुवद् वनेव यत् स्थिरम्।
निष्षहमाणो यमते नायते धन्वासहा नायते ॥३

दृह्ला चिदस्मा अनु दुर्यथा विदे
तेजिष्ठाभिररणिभिर्दाष्ट्यवसे ऽग्नये दाष्ट्यवसे ।
प्र यः पुरूणि गाहते तक्षद् वनेव शोचिषा ।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥४
तमस्य पृक्षमुपरासु धीमहि नक्तं यः
सुदर्शतरो दिवातरादप्रायुषे दिवातरात् ।
आदस्यायुर्ग्रभणवद् वीलु शर्म न सूनवे ।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ।५।१२

मैं सर्व उत्पन्न प्राणियोंके ज्ञाता, बलके पुत्र अग्निको देवताओंका आह्वान करने वाला मानता हूँ। वे यज्ञ प्रवर्तक घृत को अपनी ज्वालाओं से अनुसरण कर देवगण की कृपाओं को प्राप्त कराते है ।१। हे मेधावी प्रदोप्तिमान् अग्ने ! अङ्गिराओं में तुम सर्व श्रेष्ठ को स्तोत्रों से आहूत करते हैं। वे तुम्हारे ज्वाला रूप बाल हैं। तुम अभीष्टों की वर्षा करते हो और प्रदीप्त हुए आकाशकी ओर जाते हो। तुमको ये मनुष्य अपनी रक्षा के लिए धारण करते हैं ।२। वे प्रचण्ड रूपसे दहकते हुए अग्नि शत्रुओं का हनन करते हैं। अत्यन्त दृढ़भी उन के स्पर्श से छिन्न-भिन्न हो जाता है। वे तेजस्वी धनुर्धारी के समान डटे रहते हैं, कभी पीठ नहीं दिखाते ।३। अत्यन्त दृढ़भी इनके वशमें रहते हैं। हविदाता अपनी रक्षा के लिए हवि देते हैं। ये उस हव्य को वृक्ष की तरह खा जाते हैं। ये अन्नों को अपने बल से पकाते और दृढ़ द्रव्यों को नष्ट करने में समर्थ हैं ।४। हम इस अग्नि के लिए अन्न धारण करते हैं। ये अग्नि रात्रि में अधिक दर्शनीय होते हैं, ये दिनमें पूर्ण तेजस्विता प्राप्त नहीं करते। पुत्र के लिए पिता की शरण के समान आश्रय देते हैं। भक्त या अभक्त सभी का अन्न खाते हैं। हवि भक्षण करने वाले ये कभी वृद्ध नहीं होते ।५। (१२)

स हि शर्धो न मारुतं तुविष्वणि-
रप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः ।

आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां
नरः शुभे न पन्थाम् ॥६
द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त
भृगवो मथ्नन्तो दाशा भृगवः ।
अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् ।
प्रियाँ अपिधीर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥७
विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं
दंपतिं भुजे सत्यगिर्वाहसं भुजे ।
अतिथिं मानुषाणां पितुर्न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥८
त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे
देवतातये रयिर्न देवतातये ।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥९
प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये
स्तोमो बभूत्वग्नये ।
प्रति यदीं हविष्मान् विश्वासु क्षासु जोगुवे ।
अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत ऋषूणाम् ॥१०
स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः
सुचेतुना महो रायः सुचेतुना ।
महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।
महि स्तोतृभ्यो मघवन् त्सुवीर्यं मथीरुग्रो न शवसा ॥११॥१३

मरुतों के समान यह अग्नि उर्वरा और मरुभूमि में यज्ञ योग्य है। वह यज्ञोंमें ध्वज रूप हुए हव्य भक्षण करते हैं। अग्नि के उत्तम मार्गका अनुसरण

करते हुए सब इनकी पूजा करें ।६। भृगुओं ने मुख ऊँचा कर जब इनका यश गान किया और अग्नि के समीप जाकर हवियाँ दी, तब धनों के स्वामी अग्नि ने तृप्त होने पर प्रसन्नता प्रकट की ।७। हे प्रजाओं के स्वामी, पालक अग्ने ! तुम्हें धारण करनेके लिए आहूत करते हैं। तुम मनुष्यों के अतिथि हो। पिता के समान तुमसे ये मरणधर्मा मनुष्य अमरत्व प्राप्त करते हैं। तुम देवताओं को हवि रूप बल पहुँचाते हो ।८। हे अग्ने ! तुम देवार्चन के निमित्त प्रकट होते हो। तुम्हारा हर्ष ही बल है। ज्ञान से ही यशस्वी हो। हे जरारहित ! मनुष्य इसलिए तुम्हारी सेवा करते हैं ।६। उपासको ! बल से विजेता, प्रातःकाल में जागने वाले उपकारी अग्नि के लिए तुम्हारी वाणी स्तोत्र पाठ करे। बंदीजन जैसे स्तुति करते हैं वैसे ही यजमान हवियों से युक्त हुआ अग्नि का स्तवन करता है ।१०। हे अग्ने ! देवताओं के साथी, तुम हमारे पास रहते हुए हित-कारी धनों को लाओ। इस पृथिवीमें भोगों का नपभोग करने की हमें सामर्थ्य दो अपने स्तोताओं को बल से युक्त करो ।११। (१३)

सूक्त १२८

(ऋषि—परुच्छेपः। देवता—अग्निः। छन्द—अत्यष्टिः)

अयं जायत मनुषो धरीमणि होता यजिष्ठ
उशिजामनु व्रतमग्निः स्वमनु व्रतम् ।
विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते ।
अदब्धो होता नि षददिलस्पदे परिवीत इलस्पदे ॥१
तं यज्ञसाधमपि वातायामस्यृतस्य पथा नमसा हविष्मता
देवताता हविष्मता।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति ।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥२
एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्
दधद् रेतः कनिक्रदत् ।

शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः ।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥३
स सुक्रतुः पुरोहितो दमेदमे ऽग्निर्यज्ञस्याध्वरस्य चेतति
क्रत्वा यज्ञस्य चेतति ।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।
यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥४
क्रत्वा यदस्य तविषीषु पृञ्चते ऽग्नेरवेण मरुतां
न भोज्येषिराय न भोज्या ।
स हि ष्मा दानमिन्वति वसूनां च मज्मना ।
स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ।५।१४

ये पूजनीय होता अग्नि मनुष्यों द्वारा अरणियों से उत्पन्न हुए साधकों की सब बात सुनते हैं । वे यशस्वी को धनके समान हैं कभी पीड़ितन होने वाले होता रूप से पूजा स्थान में विराजते हैं ।१। हम अत्यन्त विनम्र हुए यज्ञानुष्ठान में घृतादि युक्त हवि भेंट करते हुए अग्निका स्तवन करते हैं । वे हमारी हवियों को ग्रहण कर बढेंगे । जैसे मातरिश्वा ने अग्नि को दूर से लाकर वनके लिये प्रदीप्त किया, वैसे हमारे यज्ञ स्नान में अग्नि दूर से आकर प्रदीप्त हों ।२। सदा स्तुत्य हवियुक्त अभीष्टदाता, समर्थ अग्नि वेदीके चारों ओर शब्द करते हुए प्राप्त होते हैं । वे स्तोत्र ग्रहण करते हुए उत्तम यज्ञं में तुरन्त प्रदीप्त होते हैं । पुरोहित रूप अग्नि यजमान के घर में अविनाशी यज्ञ के ज्ञाता है वे कर्मों को बल देने की इच्छा से हवि ग्रहण करते हैं । वे अतिथि रूप से घृत भक्षण करने वाले हविदाता को अभीष्ट देते हैं ।४। जैसे मरुद्गण भक्ष्य द्रव्यको एकत्र करते हैं, वैसे हीं मनुष्य भक्ष्य पदार्थ को एकत्र कर अग्नि को हवि देते हैं,तब वह दान की प्रेरणा करते हुए हविदाताकी पाप कर्म से वचाते हैं ।५। (१४)

विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न
शिश्रथच्छ्रवस्यया न शिश्रथत् ।

विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे ।
विश्वस्मा इत् सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥६
स मानुषे वृजने शंतमो हितो ऽग्निर्यज्ञेषु जेन्यो न विश्पतिः
प्रियो यज्ञेषु विश्पतिः ।
स हव्या भानुषाणामिला कृतानि पत्यते ।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥७
अग्निं होतारमीलते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे
हव्यवाहं न्येरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ।८।१५

अग्नि रूप वे सब स्वामी दाँए हाथ में धन लेकर परोपकारार्थ छोड़ते हैं। वे स्तोताकी हवियाँ देवताओं को पहुँचाते है। सुकर्म वालों को उत्तम धन भण्डारों के द्वार खोल देते हैं।६। वे अग्नि वेदी में राजा के समान स्थापित किये गये हैं। वे मनुष्योंकी स्तुतियों के साथ दी गई हवियो के स्वामी हैं। वह हमें वरुणादि देवगण के कोप से बचाते हैं।७। धन-धारक, अत्यन्त चैतन्य, प्रिय होता अग्नि की यजमान पूजा करते हैं। सबके प्राण रूप धनेश यजन योग्य मेधावी अग्नि के समीप सब देवगण धन की कामना वाले की रक्षा के लिए पहुँचते हैं ।८। (१५)

सूक्त १२६

(ऋषि—परुच्छेपः । देवता—इन्द्रः । छन्द—अष्टिः, शक्वरी ।)

यं त्वं रथमिन्द्र मेधसातये ऽपाका सन्तमिषिर प्रणयसि
प्रानवद्य नयसि ।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम् ।
सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥१
स श्रुधि यः स्मा पृतनासु कासु चिद्
दक्षाय्य इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः ।

यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता ।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥२

दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद् यावीररुं शूर मर्त्यं
परिवृणक्षि मर्त्यम् ।
इन्द्रोत तुभ्यं तद् दिवे तद् रुद्राय स्वयशसे ।
मित्राय वोचं वरुणाय सप्रथः सुमृलीकाय सप्रथः ॥३

अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं
वाजेषु प्रासहं युजम् ।
अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रु स्तृणोषि यम् ॥४

नि षू नमातिमतिं कयस्य चित्
तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ।
नेषि णो यथा पुराऽनेनाः शूर मन्यसे ।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ।५।१६

हे बली इन्द्र! तुम अपने रुके हुए रथको यज्ञमें पहुँचानेके लिए बढ़ाते हो। तुम हमारी रक्षा करो, बलदो ओर हमारी वाणीको ज्ञानियोंकी वाणीके समान सुनो ।१।हे इन्द्र! तुम संग्राममें आहूत होनेपर बल देनेमें समर्थ हो । बुद्धिमानी के साथ यज्ञकी प्रेरणा करते हो । युद्धके लिए वेगवान् घोड़ोको बुलानेके समान ऐश्वर्यवान् साधक तुम्हारी साधना करते हैं ।२। हे वीर ! तुम त्वचा रूप मेघ को तोड़ते हो । विरोधियों के पास नहीं जाते । मैं तुम्हारे लिए आकाश, रुद्र और वरुण के लिए उस प्रसिद्ध स्तोत्र को कहता हूँ ।३। मनुष्यो ! तुम्हारी रक्षा के लिए सब के प्राण इन्द्र से याचना करते हैं। इन्द्र ! सब युद्धों में हमारी रक्षा करो । तुम्हारा बल उल्लङ्घन योग्य नहीं है । तुम सब शत्रु-समूह पर छा जाते हो ।४। हे उग्र कर्म वाले इन्द्र ! शत्रु के मिथ्याभिमान को

भङ्ग करो। अपने रक्षा-साधनों से उचित मार्ग पर से चलो। तुम पाप-रहित हो, अग्रणी होकर मनुष्यों के पाप दूर करते हो। तुम हमारे समीप ठहरो ।५।

(१६)

प्र तद् वोचेयं भव्यायेन्दवे हव्यो न य इषवान् मन्म रेजति
रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥६
वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवार्यं
रण्वं सन्तं सुवीर्यम् ।
दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि ।
आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥७
प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां
दरीमन् दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥८
त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा
पुरो याह्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥९
त्वं न इन्द्र रायां तरूषसोग्रं चित् त्वा महिमा सक्षदवसे
महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।
अन्यमस्मद् रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥१०
पाहि न इन्द्र सुष्टुत स्रिधो ऽवयाता सदमिद् दुर्मतीनां
देवः सन् दुर्मतीनाम् ।

हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः ।
अधा हि त्वा जनिता जीजनद् वसो
रक्षोहणं त्वा जीजनद् वसो ।११।१७

मैं सोम से प्रार्थना करूँ, जो इन्द्र को बुलाने योग्य स्तोत्र की प्रेरणा देते हैं। वह निदंक की कुमति को हमसे दूर करें। पापका साधक नष्ट होकर गिरे ।६। हे इन्द्र ! हम ध्यानपूर्वक वीरतायुक्त, रमणीय, रक्षा वाले धन को माँगते हैं। सुन्दर स्तोत्रों और हवियोंसे प्रसन्न करतेहैं। सत्य हार्दिक आह्वान करते हुए तुम्हें पूजते हैं।७। मनुष्यो ! तुम्हारे और हमारे रक्षक इन्द्र बुरी-बुद्धि वालों को दूर करें। उन्हें चीर डालें। जो वर्छी हमारे लिए दैत्यों ने चलाई है, वह लौटकर उन्हीं को मारे ।८। हे इन्द्र ! तुम धन के लिए हमको प्राप्त होओ। तुम दूरहो तो भी हमारे साथ रहो। दूर या पास जहाँ कहीं हो, हमारी रक्षा करो ।९। हे अत्यन्त बली, पालक, अमर, इन्द्र ! तुम हमको धन सहित प्राप्त होओ। यश के लिए बल दो। हमारे द्रोहियों को पीड़ित करो ।१०। हे स्तुत्य इन्द्र ! पापियों का पतन करने वाले, दैत्यों के नाशक, स्तोताओं के रक्षक, पीड़ाओं से हमारी रक्षा करो। हे धनेश, हे वज्रिन् ! इसीलिए तुम प्रकट हुए हो ।११। (१७)

सूक्त १३०

(परुच्छेपः । देवता—इन्द्रः । छन्द—अष्टिः, त्रिष्टुप् ।)

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव
सत्पतिरस्तं राजेव सत्पतिः ।
हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥१
पिवा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं
न वंसगस्तातृषाणो न वंसगः ।
मदाय हर्यताय ते तुविष्टमाय धायसे ।
आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ।२

आविन्दद् दिवो निहितं गुहा निधिं
वेर्न गर्भं परिवीतमश्मन्यनन्ते अन्तरश्मनि।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः।
अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः।३।
दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव
तिग्ममसनाय सं श्यदहिहत्याय सं श्यत्।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि।४।
त्वं वृथा नद्य सर्तवे ऽच्छा समुद्रसृजो
रथाँ इव वाजयतो रथाँ इव।
इत ऊतीरयुञ्जत समानमर्थमक्षितम्।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः।५।१८

जैसे अग्नि यज्ञ को प्राप्त होते हैं, वैसे ही हे इन्द्र! तुम दूर हो तो भी हमको प्राप्त होओ। हम सोम निचोड़कर बलके लिए तुम्हारा आह्वान करते हैं। पुत्र द्वारा पिता को बुलाने के समान हम तुम्हें बुलाते हैं।१। हे इन्द्र! पत्थर से निचोड़े गए इस सोम का पान करो। यह तुम्हारे बल कीर्ति और पुष्टि का वर्द्धक हो। तुम्हारे अश्व सूर्य के अश्वों के समान यहाँ आवें।२। अङ्गिराओं में प्रधान इन्द्र ने पवन की गुफा में छिपे हुए खजाने को ढूँढकर पाया। उन्होंने गौओं के गोष्ठ के समान उसे खोल दिया।३। इन्द्र ने वज्र को खूब पैनाया। हे इन्द्र! तुम बल से युक्त होकर उस वृत्र को बढ़ई के समान काटते हो।४। हे इन्द्र! तुमने नदियों को समुद्र की ओर जाने के लिए रथोंके समान छोड़ा है। इन नदियों के नाश न होने वाले धनका सम्पादन किया है, जैसे गौएँ मनुष्यो को पुष्टि प्रद धन देती हैं।५। (१८)

इमां ते वाचं वसूयन्त आयवो रथं न धीरः
स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम्।

अत्यमिव शवसे सातये धना विश्वा धनानि सातये ।६।
भिनत् पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि
दाशुषे नृतो वज्रेण दाशुषे नृतो ।
अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ।७।
इन्द्रः समत्सु यजमानमार्यं प्रावद् विश्वेषु ।
शतमूतिराराजिषु स्वर्मीह्लेष्वाजिषु ।
मनवे प्रासदव्रतान् त्वचं कृष्णामरन्धयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ।८।
सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो
मुषायतीशान आ मुषायति ।
उशना यत् परावतोऽजगन्नूतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ।९।
स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्त्तः पातुभिः पाहि शग्मैः ।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ।१०।१९

हे इन्द्र ! धनेच्छुक मनुष्यों ने तुम्हारे लिए स्तोत्र रचे हैं । उसी प्रकार जैसे चतुर कारीगर रथ बनाता है, वे तुम्हारा शृंङ्गार करते है, तुम्हारे अश्व को सजाते हैं । धन की प्राप्ति के लिए वह सब करते हैं ।६। हे इन्द्र ! तुमने "पुरु" और "दिवोदास' के लिए शत्रु के दुर्गों को तोड़ा । अपने तेजसे "अतिथिग्व" को महान् धन दिया और "शम्बर" को पर्वत से गिरा दिया दिया ।७। इन्द्र ने अपने साधक की अत्यन्त रक्षा की, व्रतहीनों को दण्ड दिया वे दस्युओं और लालचियों को नष्ट करने वाले हैं।८। सूर्य के उदय होते ही प्रकाश पुञ्ज बढ़ा । उसकी लाली ने पापियों की वाणी छीन ली । हे इन्द्र! तुम स्नेहवश दूर से रक्षा के लिए यहाँ आये । तुम शीघ्रता से सब धनों को देते हो ।९। शत्रु-दुर्ग-भंजक इन्द्र ! तुम नये स्तोत्रों अनुष्ठानों और सहायताओं से हमारी रक्षा

करो। दिवोदास के वंशजों की स्तुति से दिनसे आकाशके बढ़ने के समान वृद्धि को प्राप्त होओ ।१०। (१९)

सूक्त १३१

(ऋषि–परुच्छेप: । देवता–इन्द्र: । छन्द–अष्टि:)

इन्द्राय हि द्यौरसुरो अनम्नतेन्द्राय मही
पृथिवी वरीमभिर्द्युम्नसाता वरीमभि: ।
इन्द्रं विश्वे सजोषसो देवासो दधिरे पुर: ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥१
विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यव: पृथक्
स्व: सनिष्यव: पृथक् ।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यज्ञैश्चितयन्त आयव: स्तोमेभिरिन्द्रमायव: ॥२
वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य
नि:सृज: सक्षन्त इन्द्र नि:सृज: ।
यद् गव्यन्ता द्वा जना स्वर्यन्ता समूहसि ।
आविष्करिक्रद् वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् । ३
विदुष्टे अस्य वीर्यस्य पूरव: पुरो यदिन्द्र शारदीरवातिर:
सासहानो अवातिर: ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णा: पृथिवीमिमा अपो मन्दसान इमा अप: ॥४
आदित् ते अस्य वीर्यस्य चर्किरन् मदेषु वृषन्नुशिजो यदाविथ
सखीयतो यदाविथ ।
चकर्थ कारमेभ्य: पृतनासु प्रवन्तवे ।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्त: सनिष्णत ॥५
उतो नो अस्या उषसो जुषेत ह्यर्कस्य हविषो हवीमभि:
स्वर्षाता हवीमभि: ।

यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयस ॥६
त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं
वज्रेण शूर मर्त्यम् ।
जहि यो नो अधायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ।७।२०

इन्द्र के लिए आकाश नत हुआ, पृथिवी भुक गई, यजमान बहुत अन्न के लिए झुका है। सभी देवताओं ने एक मत होकर इन्द्र को अग्रगण्य बनाया ! मनुष्यों द्वारा दी गई गोमयुक्त आहुतियाँ इन्द्रको प्राप्त हों ।१। हे इन्द्र ! सभी सोमयागों में यजमान सभीके प्रतिविधि रूप तुम्हें हव्य देते हैं। नाव के समान पार लगाने वाले इन्द्र को यज्ञ द्वारा चैतन्य करते हुए सेना के आगे स्थापित करते हैं। मनुष्य स्तोत्रोंद्वारा उसका घिन्तन करते हैं ।२।हे इन्द्र ! रक्षा चाहने वाले गृहस्थ अपनी पत्नी सहित गौओं की प्राप्ति के लिए तुम्हारे चारों ओर इकट्ठे होते हैं। उनके यज्ञादि कर्मोंसे अभीष्ट फतु प्राप्य होता है। तुमने अपने साथ रहने वाले वज्रको प्रकट किया है ।३। हे इन्द्र ! तुम्हारे पराक्रम को मनुष्य जानते हैं। तुमने अयाज्ञिकों के गढ़ों को नष्ट किया है। तुमने उन शत्रुओं को दण्डित किया है। तुमने विशाल पृथिवी और जलोंको जीता है। । हे इन्द्र! सोमसे आनन्द प्राप्तकर अभीष्ट देने वाले होओ। अपने साधकोंके रक्षक बनो। यजमान के लिए तुम युद्धों में प्रवृत्त होते हो। सभी तुमसे अन्न प्राप्ति की इच्छा करते हैं ।५। हे इन्द्र ! हमारे प्रातःकालीन यज्ञ में हमारी हवियाँ ग्रहण करो और हमारी स्तुतियों पर ध्यान ध्यान दो। हे वज्रिन् ! तुम शत्रुओं के हननकर्त्ता हो। मुझ असाधारण बुद्धि वाले के सुन्दर स्तोत्र को सुनो ।६। हे इन्द्र ! तुम हमारी रक्षा के लिए बढ़ते हुए उस शत्रु का हनन करो जो हमको पीड़ित करता है। हे वीर ! तुम्हारे वज्र की मार से वे दुष्ट बुद्धि वाले पीड़क दूर भाग जावें ।७।

सूक्त १३२

(ऋषि- परुच्छेप: । देवता–इन्द्रापर्वतौ । छन्द अष्टि:,)

त्वया वयं मघवन् पूर्व्ये धन इन्द्रत्वोताः
सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।
नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते ।
अस्मिन् यज्ञे वि चयेमा भरे कृतं वाजयन्तो भरे कृतम् ॥१
स्वर्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नञ्जसि
क्राणस्य स्वस्मिन्नञ्जसि ।
अहन्निन्द्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः ।
अस्मत्रा ते सध्र्यक् सन्तु रातयो भद्रा भद्रस्य रातयः ॥२
तत् तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन् यज्ञे
वारमकृण्वत क्षयमृतस्य वारसि क्षयम् ।
वि तद् वोचेरध द्वितान्तः पश्यन्ति रश्मिभिः ।
स घा विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ॥
नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरप
व्रजमिन्द्र शिक्षन्नप व्रजम् ।
ऐभ्यः समान्या दिशाऽस्मभ्यं जेषि योत्सि च ।
सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥४
स यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त
श्रवस्यवः प्र यक्षन्त श्रवस्यवः ।
तस्मा आयुः प्रजावदिद् बाधे अर्चन्त्योजसा ।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥५
युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप
तंतमिद्धतं वज्रेण तंतमिद्धतम् ।
दूरे चत्ताय च्छन्त्सद् गहनं यदिनक्षत् ।
अस्माकं शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ।६।२१

हे इन्द्र ! हम तुम्हारे रक्षा-साधनों से सम्पन्न होकर शत्रुओं को पराजित करें, उनको अधिक पीड़ा दें । सोम-निष्पन्नकर्त्ता को उत्साहित करो जिससे हम युद्ध में खूब धनोंको जीतें ।१। इन्द्र ने प्रातःकाल जागकर आह्वान करने वाले यजमान के लिए प्रकट होकर शत्रुओं का हनन किया है । उस इन्द्र को सर्वज्ञ मानकर स्तुति करो । हे इन्द्र ! तुम्हारा दिया ऐश्वर्य हमारा कल्याण करे ।२। ये पुष्टिकारक हवियाँ तुम्हारे लिए हैं । तुम्हारे पूर्वजों ने यज्ञ द्वारा शरीर क्षय को बल से रोक दिया । वे इन्द्र यजमानों के लिए गौओं के देनेकी इच्छा वाले माने गये हैं ।३। हे इन्द्र ! पूर्व के समान तुम्हारे वर्तमान पराक्रम का भी यश गान करना चाहिए । तुमने अङ्गिराओं को गौएँ जीत कर दीं । तुम युद्ध में विजय प्राप्त कराने वाले होओ । यज्ञ विरोधियों को सोम निष्पन्नकर्त्ताके वश में करो ।४। इन्द्र मनुष्यों को विवेक बुद्धि देते हैं । यज्ञ की इच्छा से शत्रुओं । पर आक्रमण करते हैं । यजमान यज्ञ करते हुए तुमसे धन मागते हैं । उनके स्तोत्र सब देवताओं को लक्ष्य करते हुए इन्द्र में ही व्याप्त होते हैं ।५। हे इन्द्र ! हमसे लड़नेकी इच्छा करने वालेको तुम आगे बढ़कर हटाओ । तुम्हारा वज्र दूर से भी शत्रु को नष्ट करने में समर्थ है । इन्द्र ! शत्रुओं को सब ओर से चीर डालो ।६।

(२१)

सूक्त १३३

(ऋषि–परुच्छेपः । देवता–इन्द्रः । छन्द–त्रिष्टुप्, अनुष्टुप् गायत्री, धृतिः, अष्टिः)

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृह्ला अशेरन् ॥१
अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम् ।
छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥२
अवासां मघवञ्जहि शर्धो यातुमतीनाम् ।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥३

यासां तिस्रः पञ्चाशतो ऽभिव्लङ्गै रपावपः ।
तत् सु ते मनायति तकत् सु ते मनायति ।।४
पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण ।
सर्वं रक्षो नि बर्हय ।।५
अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ
अद्रिवो घृणान्न भीषाँ अद्रिवः ।
शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे ।
अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूप सत्वभिः ।।६
वनोति हि सुन्वन् क्षयं परीणसः सुन्वानो हि ष्मा
यजत्यव द्विषो देवानामव द्विषः ।
सुन्वान इत् सिषासति सहस्रा वाज्यवृतः ।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ।७।२२

मैं आकाश और पृथिवी को यज्ञ द्वारा पवित्र करता हूँ। इन्द्र के द्रोहियों और उनकी भूमि को जलाता हूँ। उस स्थान पर शत्रु मारे गये और खड्डोंमें में डाल दिए ।१। हे वज्रिन् ! शत्रु-सेनाओं को अपने हाथी के पाँव से कुचल डालो ।२। हे इन्द्र ! उनकी शक्ति का नाश करो और कुचल कर गहरे खड्डों में डाल दो ।३। हे इन्द्र! तुमने जिनकी त्रिगुणित पचास (डेढ़ सौ) सेनाओं को नष्टकर डाला, तुम्हारा यह कर्म महान् हैं। तुम्हारे लिए यह कार्य बहुत छोटा है ।४। हे इन्द्र ! क्रोध से लाल हुए उन दुष्ट पिशाचों का नाश करो। सब राक्षसों को समाप्त कर दो ।५। हे वज्रिन् ! तुम उन विकराल दैत्यों को विदीर्ण करो। हमारी प्रार्थना सुनो ! प्रदीप्त अग्नि से डर कर जैसे कोई शोक करे वैसे तुम्हारे डर से शत्रु शोक करें। तुम शत्रुओं से युद्ध करने को जाते हो। तुम वीर किसीसे न होने वाले तथा यजमानों को पीड़ित नहीं होने देते हो ।६। सोम निष्पन्नकर्त्ता यजमान, गृह स्वामी देवताओं के शत्रुओं को भगाता है और अजेय होकर सहस्रों धनोंकी इच्छा करताहै। इन्द्र उसे पर्याप्त धन देते हैं ।७।

सूक्त १३४ (बीसवाँ अनुवाक)

(ऋषि–परुच्छेप: । देवता–वायु: । छन्द–अष्टि:, अत्यष्टि: ।)

आ त्वा जुवो रारहाणा अभि प्रयो वायो वहन्त्विह
पूर्वपीतये सोमस्य पूर्वपीतये ।
ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती ।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥१
मन्दन्तु त्वा मन्दिनो वायविन्दवो ऽस्मत् क्राणास: सुकृता
अभिद्यवो गोभि: क्राणा अभिद्यव: ।
यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतय: ।
सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धिय: ॥२
वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि
वोह्लवे वहिष्ठा धुरि वोह्लवे ।
प्र बोधय पुरंधिं जार आ ससतीमिव ।
प्र चक्षय रोदसी वासयोषस: श्रवसे वासयोषस: ॥३
तुभ्यमुषास: शुचय: परावति भद्रा वस्त्रा तन्वते दंसु
रश्मिषु चित्रा नव्येषु रश्मिषु ।
तुभ्यं धेनु: सबर्दुघा विश्वा वसूनि दोहते ।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्य: ॥४
तुभ्यं शुक्रास: शुचयस्तुरण्यवो मदेषूग्रा इषणन्त
भुर्वण्यपामिषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ।
त्वं विश्वस्माद् भुवनात् पासि धर्मणाऽसुर्यात्
पासि धर्मणा ॥५
त्वं नो वायवेषामपूर्व्य: सोमानां प्रथम: पीतिमर्हसि
सुतानां पीतिमर्हसि ।

उतो विहुत्मतीनां विशां ववर्जुषीणाम् ।
विश्वा इत् ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम् ६।२३

हे वायो ! सोम-पानके लिए वेगवान् अश्व तुम्हें प्रथम यहाँ लावें । हमारी स्तुति रूपवाणी उन्नत हुई तुम्हारे गुणोंको जानती है,वह तुम्हारे अनुकूल हो । तुम जुते हुए रथ से युक्त हुए हविदाता को प्राप्त होओ ।१। हे वायो ! हमारे प्रभावशाली, सुपुष्ट सोम, तुम्हें पुष्ट करें । दूध के प्रभाव से युक्त हुए इन सोमों के प्रति चलने के लिए तुम्हारे अश्व बल प्राप्त करें । स्तोताओं की स्तुतियोंके प्रति बल से आवें ।२। चलने के लिए लाल रङ्गके घोड़ों को वायु अपने रथ में जोड़ते हैं । वे रथ की धुरी में सुनहरे द्रुतगामी अश्वों को जोड़कर प्रेमी द्वारा सोती हुई स्त्री को जगाने के समान पृथिवी को जगाते हैं । वे यश के निमित्त उषा को स्थित करते हैं ।३। हे वायो चमकती हुई उषाएँ दूर देशस्थ घरों में तुम्हारे लिए किरण रूप वस्त्रो की फैलाती हैं । विविध रङ्ग वाली किरणोंको वढ़ाती हैं । अमृतरूप दूध वाली गोंएँ तुम्हारे लिए सब धनों का दोहन करती हैं । तुमने वर्षा के लिए मरुतों को प्रकट किया है ।४। हे वायो ! ये चमकते हुए पुष्टिकर सोम तुम्हारे लिए प्राप्त होते हैं । शत्रु के भयसे क्षीण होता हुआ यजमान तुम्हारा शीघ्रतासे आह्वान करता है । तुम धर्म द्वारा लोकोंके रक्षक हो ओर राक्षसों से उपासको को बचाते हों ।५। हे वायो! हमारे द्वारा निचोड़े इन सोमों को पीने में तुम समर्थ हो । तुम्हारे लिए ये अत्यन्त दूध देने वाली गौएँ सोम में मिलाने के लिए दूध और घृत को दोहन करती हैं ।६। (२३)

सूक्त १३५

(ऋशि—परुच्छेपः । देवता—वायुः । छन्द—अष्टिः, अत्यष्टिः ।)

स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते
शतिनीभिर्नियुत्वते ।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।
प्र ते सुतासो मधुमन्तो अस्थिरन् मदाय क्रत्वे अस्थिरन् ॥१

तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि
कोशमर्षति शुक्रा वसानो अर्षति ।
तवायं भाग आयुषु सोमो देवेषु हूयते ।
वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ।।२
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि
वीतये वायो हव्यानि वीतये ।
तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ।
अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।।३
आ वां रथो नियुत्वान् वक्षदवसेऽभि प्रयांसि सुधितानि
वीतये वायो हव्यानि वीतये ।
पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम् ।
वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम् ।।४
आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त
वाजिनमाशुमत्यं न वाजिनम् ।
तेषां पिबतमस्मयू आ नो गन्तमिहोत्या ।
इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ।५।२४

हे वायो ! हवि सेवन के लिए बिछी हुई कुशाको प्राप्त होओ । ऋत्विजों ने तुम्हारे सेवनके लिए पहले से ही सोम तैयार रखा है । निष्पन्न सोम तुमको बल देगा और पुष्ट करेगा।१। हेवायो ! यह सिद्धक्रिया सोम बल धारण करता हुआ कलशकी ओर जाता है । यह सोम हवियुक्त किया जाताहै । हम कामना करने वालों की ओर तुम अपने घोड़ों को प्रेरित करो ।२। वायो ! सैकड़ों-हजारों के द्वारा हमारे यज्ञ में आकर हवि ग्रहण करो यह तुम्हारा भाग सूर्य के समान तेज वाला है । अध्वर्युओं ने तुम्हारे लिये यह सोम अर्पण किए हैं ।३। हे वायो ! सुन्दर हवि रूप अन्नों की ओर तुम्हारा रथ रक्षार्थ चले । तुत मधुर सोम का पान करो तुम उज्ज्वल धनों से युक्त हो ! इन्द्र के साथ यहाँ

आओ ।४। हे इन्द्र और वायु ! हमारी स्तुतियाँ तुम्हें यज्ञ की ओर आकर्षित करें। ऋत्विजों ने सोम छानकर रखा है, उसे यहाँ आकर पीओ और हमारी रक्षा करो ।५। (२४)

इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत
वायो शुक्रा अयंसत ।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः ।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥६
अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं
गृहमिन्द्रश्च गच्छतम् ।
वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुया याथो
अध्वरमिन्द्रश्च याथो अध्वरम् ॥७
अत्राह तद् वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवो
ऽस्मे ते सन्तु जायवः ।
साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो
नाप दस्यन्ति धेनवः ॥८
इमे ये ते सु वायो बाह्वोजसो ऽन्तर्नदी ते पतयन्त्युक्षणो
महि व्राधन्त उक्षणः ।
धन्वञ्चिद् ये अनाशवो जीराश्चिदगिरौकसः ।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ।९।२५

हे वायो ! अध्वर्युओं द्वारा प्राप्त हुए निष्पन्न सोम प्रस्तुत हैं। ये तुम दोनों के लिए ऊनी वस्त्र में छाने गये हैं ।६। हे वायो ! सब सोते हुओं को जगाते हुए आओ। सोम कूटने के पाषाण के शब्द से आकर्षित होओ ।७। हे इन्द्र और वायो ! तुम इस मधुर सोम की आहुति ग्रहण करो। इस पीपल रूप सोम को अजेय व्यक्ति पीते हैं। हमारी गौएँ क्षीण

न हो हमारा अन्न परिपक्व हो जाय ।८। ये तुम्हारे पराक्रमी बैल नदी रूप प्रवाह में दौड़ते हैं। ये मरुस्थल में भी नष्ट नहीं होते। ये सूर्य रश्मियों के समान अबाध गति वाले हैं ।९। (२५)

सूक्त १३६

(ऋषि—परुच्छेपः। देवता—मित्रावरुणौ। छन्द—अत्यष्टिः, त्रिष्टुप्।)

प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां
स्वादिष्ठं मृळयद्भ्याम्।
ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता।
अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥१
अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त
रश्मिभिश्चक्षुर्भगस्य रश्मिभिः।
द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च।
अथा दधाते बृहदुक्थ्यं वय उपस्तुत्यं बृहद् वयः ॥२
ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे
जागृवांसा दिवेदिवे।
ज्योतिष्मत् क्षत्रमाशाते आदित्या दानुनस्पती।
मित्रस्तयोर्वरुणो यातयज्जनो ऽर्यमा यातयज्जनः ॥३
अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो
देवो देवेष्वाभगः।
तं देवासो जुषेरत् विश्वे अद्य सजोषसः।
तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥४
यो मित्राय वरुणायाविधज्जनो ऽनर्वाणं तं परि पातो अंहसो
दाश्वांसं मर्तमंहसः।
तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम्।

उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥५
नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीह्लुषे
सुमृलीकाय मीहुलुषे ।
इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।
ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥६
ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ।७।२६

मनुष्यो ! नमस्कार पूर्वक मित्र और वरुण के लिये सोम सम्पादन करो। वे घृतयुक्त हवि योग्य यज्ञों में स्तुति किये जाते है और उनका देवत्व कभी नहीं घटता ।१। सूर्य का विस्तृत मार्ग नियम रूप डोरीपर थमा हुआ है। मित्र अर्यमा और वरुण का स्थान अत्यन्त उज्ज्वल है । वे यहाँ से महान बल प्रदान करते हैं ।२। पृथिवी की धारक और आकाश से युक्त अदिति की, मित्र-वरुण नित्य सेवा करते हैं। ये दान के स्वामी आदित्य तेजस्वी हैं । मित्र, वरुण और अर्यमा तीनों ही मनुष्यों को प्रेरणा देते हैं ।३। यह सोम मित्र और वरुण को सुख दे । देवता उससे आनन्दित हों, सभी देवता समान इच्छा से इसका सेवन करें । वह हमारी इच्छानुसार ही कार्य करें ।४। मित्र वरुण की सेवा करने वाले को वे शत्रु और पापोंसे बचाते हैं । हविदाता की रक्षा करते है। जो इनके नियमोंको मानता हुआ स्तुति करताहै उसकी अर्यमा रक्षा करते हैं ।५। महान आकाश, भूमि, मित्र और वरुण को नमस्कार करता हूँ। हम इन्द्र, अग्नि, अर्यमा भग की निकट से स्तुति करें और पुत्र आदि से युक्त हुए रक्षाओं को प्राप्त करें ।६। देवताओं की रक्षा से हमारी ओर आकर्षित हुए और उनके साक्षी मरुतों की प्रशंसा करें । अग्नि, मित्र, वरुण हमारे शरण दाता हैं । उनसे हम अभीष्ट धन प्राप्त करें ।७। (२६)

॥ प्रथमो अध्यायः समाप्तः ॥

सूक्त १३७

(ऋषि-परुच्छेप: । देवता-मित्रावरुणौ । छन्द-शक्वरी)

सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशा ऽस्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥१
इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।
सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ॥२
तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नो ऽर्वाञ्चा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ।३।१

हे मित्रावरुण ! हमने सोम निष्पन्न कर लिया है । तुम दोनों यहाँ आकर इस दूध मिले हुए पुष्टिकारक सोम का पान करो और हमारे रक्षक, होओ ।१। हे मित्र वरुण ! यह सोम दधियुक्त है । तुम दोनों उषा काल होतेही आओ । तुम दोनों के लिए इस यज्ञ-कर्म में सोम निष्पन्न किया गया है।२। हे मित्र वरुण ! तुम दोनों के लिए मनुष्यों ने सोमका गौं दुग्ध के समान दोहन किया है । तुम हमारे रक्षक सोम पीने के लिए हमारी ओर आओ । हमने तुम्हारे पीने के लिए यह सोम निष्पन्न किया है ।३। (१)

सूक्त १३८

(ऋषि—परुच्छेप: । देवता—पूषा । छन्द—अत्यष्टिः)

प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते
स्तोत्रमस्य न तन्दते ।
अर्चामि शुम्नयन्नहमन्त्यूतिं मयोभुवम् ।

विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥१
प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध
उष्ट्रो न पीपरो मृधः ।
हुवे यत् त्वा मयोभुवं देवं सख्याय मर्त्यः ।
अस्माकमाङ्गूषान् द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥२
यस्य ते पूषन् त्सख्ये विपन्यवः क्रत्वा चित् सन्तोऽवसा बुभुज्रिर
इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेलमान उरुशंस सरी भव वाजेवाजे सरी भव ॥३
अस्या ऊ षु ण उप सातये भुवो ऽहेलमानो ररिवाँ अजाश्व
श्रवस्यतामजाश्व ।
ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ।४।२

पूषा (सूर्य) का अत्यन्त महत्व है। उसका बल कम नहीं होता। उस का स्तोत्र सदा बढ़ाने वाला है। मैं कल्याणकी इच्छासे उसे नमस्कार करता हूँ उसने सब के मनों को आकर्षित कर लिया है।१ हे पूषा! शीघ्रगामी मनुष्य को मार्ग में उचित दिशा बतानेके समान तुम्हें स्तोत्र प्रेरणा करता हूँ। जिससे तुम हमारे शत्रुओंको दूर करो। मैं तुम्हारा आह्वान करता हूं। मुझे युद्धोंमें बलवान बनाओ।२। हे पूषन्! तुम्हारी स्तुति में लगे हुए व्यक्ति ही तुम्हारी रक्षाओं को प्राप्त कर सकें। हम ज्ञान से सम्पन्न हुए नये स्तोत्र द्वारा तुमसे असंख्य धन की याचना करते हैं। तुम हम पर क्रोध न करो। प्रत्येक युद्ध में हमारे सहायक बनो।३। हे अजाश्व पूषन्! तुम दान के लिए क्रोध रहित हुए यहाँ आओ। हम यशकी कामना करते हैं। हम तुम्हारा अनादर नहीं करते। आपके मित्र-भाव की उपेक्षा नहीं करते। तुम अद्भुत कर्म वाले हमारे स्तोत्रों पर ध्यान दो ।४।

(२)

सूक्त १३६

(ऋषि-परुच्छेपः । देवता-विश्वेदेवा आदि । छन्द-अष्टि बृहती, त्रिष्टुप्)

अस्तु श्रौषट् पुरो अग्नि धिया दध आ नु तच्छर्धो दिव्यं वृणीमह
इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥१

यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना
दक्षस्य स्वेन मन्युना ।
युवोरित्थाधि सद्मस्वपश्याम हिरण्ययम् ।
धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥२

युवां स्तोमेभिर्देवयन्तो अश्विना ऽऽश्रावयन्त इव श्लोकमायवो
युवां हव्याभ्यायवः ।
युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा ।
प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥३

अचेति दस्रा व्युनाकमृण्वथो युञ्जते वां रथयुजो
दिविष्टिष्वध्वस्मानो दिविष्टिषु ।
अधि वां स्थाम वन्धुरे रथे दस्रा हिरण्यये ।
पथेव यन्तावनुशासता रजो ऽञ्जसा शासता रजः ॥४

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम् ।
मा वां रातिरुप दसत् कदा चनास्मद् रातिः कदा चन ॥५॥३

मैंने पहले अग्नि को धारण किया । अब दिव्य मरुद्गण को वरण करता हूं । इन्द्र और वायु का वरण करता हूं मेरी स्तुति सूर्य रूप को प्राप्त हो ।१। हे मित्र वरुण ! तुम अपने तेजसे असत्य का निवारण करने वाले हो । हमने तुम्हारे स्थानमें स्वर्णिम तेजके दर्शन किये हैं ।२। हे अश्वि देवो ! साधक तुम्हारी स्तुति करते हैं,हवियाँ देते हैं। सबोधन और अन्न तुम्हारे आश्रितहै ।

तुम्हारे रथ के पहिये की धारा घृत की वर्षा करती है।३। तेजस्वी अश्विनी कुमारो ! तुम ही आकाश मार्गों को प्रशस्त करते और यज्ञों के लिये अश्व जोतते हो। तुम विकराल कर्म वाले हो। तुम सुनहरी रथ की पीठपर बैठे हुए सीधे मार्ग से चलते हो। तुम अन्तरिक्ष के स्वामी हो।४। हे बल। ऐश्वर्य शाली अश्विद्वय ! दिन में और रात में भी धन दो। तुम्हारा दिया हुआ धन कभी कम न हो और हमारा दान भी बढ़े।५। (३)

वृषन्निन्द्र पृषपाणास इन्दव इमे सुता अद्रिषुतास
उद्भिदस्तुभ्यं सुतास उद्भिदः।
ते त्वा मन्दन्तु दावने महे चित्राय राधसे।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृलीको न आ गहि ॥६
ओ षू णो अग्ने शृणुहि त्वमीलितो देवेभ्यो ब्रवसि यज्ञियेभ्यः
राजभ्यो यज्ञियेभ्यः।
यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥७
मो षु वो अस्मदभि तानि पौंस्या सना भूवन् द्युम्नानि मोत
जारिषुरस्मत् पुरोत जारिषुः।
यद् वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम्।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥८
दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो
अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः।
तेषां देवेष्वायतिरस्माकं तेषु नाभयः।
तेषां पदेन मह्या नमे गिरेन्द्राग्नी आ नमे गिरा ॥९
होता यक्षद् वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः
पुरुवारेभिरुक्षभिः।

जगृम्भा दूरआदिशं श्लोकमद्रे रध त्मना ।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥१०
ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।११।४

हे इन्द्र ! वीरों के लिए पेय पाषाणों द्वारा निष्पन्न सोम की बूंदे यहाँ उपस्थित हैं । ये तुम्हें विभिन्न धनों के लिये तृप्त करें । हे स्तुतियों को प्राप्त करने वाले, तुम हमारी ओर आकर हम पर कृपा करो।६। हे अग्नि ! हमारी स्तुतियोंपर ध्यान दो देवगणके सामने निवेदन करो । हे देवगण ! जब तुमने गौएं जीतकर अङ्गिराओं को दीं तब अर्यमा ने उसका कूप में दोहन किया।७। हे मरुद्गण ! तुम्हारे वीर कर्मों को हम न भूलें । तुम्हारा यश अक्षुण्ण रहे । तुम्हारा अद्भुत कर्म युग-युग में गूंजता है । वह दुःख से तारने वाला कर्म हमको धारण कराओ ।८। प्राचीन ऋषि "दध्य", 'अङ्गिरा", "प्रियमेध" "कण्व", "अत्रि" और "मनु' मेरे जन्म के ज्ञाता हैं वे दिव्य गुणों से युक्त है । उन अत्यन्त गौरवशाली इन्द्र और अग्निकी नमस्कार पूर्वक स्तुतियाँ करता हूँ ।९। होता अग्नि याज्या पढ़ते और हवि के देवता हवि डालते हैं । बृहस्पति निष्पन्न सोमों द्वारा यज्ञ करते हैं । उत्तमकर्मा बृहस्पति ने प्रभूत जलों को धारण किया है ।१०। हे देवगण ! तुम आकाश में ग्यारह हो, पृथिवी पर भी ग्यारह हो, अपने महत्वसे अन्तरिक्ष में भी ग्यारह हो । इस प्रकार तुम तैंतीसों देवता मेरे यज्ञ को स्वीकार करो ।११। (४)

सूक्त १४० [इक्कीसवाँ अनुवाक]

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—जगती, त्रिष्टुप् ।)

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥१

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्यन्येन वनिनो मृष्ट वारणः ॥२
कृष्णप्रुतौ देविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः ॥३
मुमुक्ष्वो मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः ॥४
आदस्य ते ध्वसन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत् सीं महीमवनिं प्राभि मर्मृशदभिश्वसन् त्स्तनयन्नेति नानदत् ।५।

हे मनुष्यो ! वेदी में प्रतिष्ठित, प्रकाशवान अग्नि के लिए हवियाँ सम्पादन करो । उस पवित्र ज्योति रूप रथ वाले, अन्धकारके नाशक अग्निको अपने स्तोत्रोंसे वज्र के समान ढको ।१। दो बार प्रकट होने वाले अग्नि तीन प्रकार से अन्नों को प्राप्त करते और भक्षण किये अन्नको वर्ष भर में ही बढ़ा देते हैं। वह एक मुख से हवि भक्षण करते और दूसरे से वन-वृक्षों को निःशेष करते हैं ।२। इसके प्रज्वलन से काली हुई इसकी दोनों माताएं कम्पित होती हैं । यह आगे वाले, वेगवान्, भिन्न वर्ण वाले, द्रुतगामी हैं । इनके घोड़े वायुकी प्रेरणा से जुड़ते हैं ।३-४। यह अग्नि पृथिवीको सब ओरसे स्पर्श करते हैं । यह शब्दवान् जब श्वास लेतेहैं इनकी चिनगारियां फैलती हुई अन्धकारका नाश करती बढ़ती हैं ।५।
(५)

भूषन् न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥६
स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद् वर्पः पित्रोः कृण्वते सचा ॥७
तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम् ॥८
अधीवासं परि मातू रिहन्नह तुविग्रेभिर्याति वि ज्रयः ।

वयो दधत् पद्वते रेहिहत् सदाऽनु श्येनि सचते वर्तनीरह ॥९
अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान् वृषभो दमूनाः।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ।१०।६
इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते।
यत् ते शुक्रं तन्वो रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥११
रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥१२
अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः।
गव्यं यव्यं यन्तो दीर्घाहेषं वरमरुण्यो वरन्त ।१३।७

जो अग्नि पीछे वर्ण वाली बूटियों को आच्छादित करने के समान प्रेरते हैं, बैल के समान गरजते और बल द्वारा शरीर को चमकाते हैं, वह वश में न आने वाले बैल के समान ज्वाला रूप सींगोंको हिलाते हैं।६। वह अग्नि प्रकट होकर औषधियों को प्राप्त करते हैं। वे उनके प्रभाव से वृद्धि को प्राप्त होती हैं। उनमे दिव्य गुण भर जाते हैं। फिर ये अग्नि औषधियाँ मिलकर पृथिवी और आकाशको दिव्य गुण बनाते हैं।७। लम्बी शिलायें अग्निका स्पर्श करती हैं। वे मृत-प्राय होते हुए भी अग्नि से मिलने के लिए प्राणवान हो उठती हैं। अग्नि उसका वृद्धपन मिटाते हुए गर्जन करते चलते हैं।८। पृथिवी रूप माता के परिधान रूप तृण, औषधि आदिको चाटते हुए अग्नि विजयशील के समान चले जाते हैं। फिर दुपाये और चौपाये को बल देते हैं। वे जिधर से निकलते हैं उधर ही उनके पीछेका मार्ग काला होता जाता है।९। हे अग्ने! तुम दानशील के घर में प्रदीप्त होते हुए बैलके समान श्वास लेते हो। फिर ऐसे लगते हो जैसे कोई किशोरावस्था-प्राप्त वीर कवच धारण कर युद्ध की ओर जाता हुआ चमकता है।१०।

(६)

हे अग्ने! यह उत्तम प्रकार निवेदन किया गया स्तोत्र तुम्हें अधिक प्रिय हो। तुम्हारा निर्मल और प्रकाशयुक्त शरीर चमकता है। हमारे निमित्त रमणीय धनों के देने वाले होओ।११। हे अग्ने! तुम हमारे घर के मनुष्यों

को अथवा योद्धा के लिए ऐसी यज्ञ रूप नाव प्रदान करो जो हम सब को पार लगाती हुई आश्रय रूपबनें ।१२। हे अग्ने ! स्तोत्रको बढ़ाओ । आकाश पृथिवी और स्वर्गको गमनशील नदियाँ हमको गवादि पशु, अन्न और दीर्घायु प्रदान करें तथा उषाएँ हमको वरणीय अन्न, बल प्राप्त कराने वालीहों ।१३। (७)

सूक्त १४१

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—जगती, त्रिष्टुप्)

बलित्था तद् वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥१
पृक्षो वपुः पितुमान् नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥२
निर्यदी बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥३
प्र यत् पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद् यविष्ठो अभवद् घृणा शुचिः ॥४
आदिन्मातॄराविशद् यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत् पूर्वा अरुहत् सनाजुवो नि नव्यसीष्ववरासु धावते ।५।८

अग्नि जिस बल से उत्पन्न हुए हैं, उसी बल-रूप दर्शनीय तेज को धारण करते हैं । उनकी कृपा से ही अभीष्ट सिद्धि होती है । सत्य वाणियाँ प्रवाहित होती हैं ।१। अन्न-साधक अग्नि अन्नों में व्याप्त रहते हैं । दूसरे सात कल्याण कारिणी मातृ रूपी धातुओं में व्याप्त होते हैं तीसरे अग्नि को दश उँगलियाँ घर्षण द्वारा प्रकट करती हैं ।२। ऋत्विजों ने बड़े यज्ञ को सिद्ध करने वाले मूल से अग्नि को उत्पन्न किया । मातरिश्वा प्राचीन कालमें अग्नि को जल से क्रम पूर्वक मन्थन करते थे ।३। जब अग्नि को उत्कृष्टता के लिए चारों ओर ले जाते हैं, तब वे औषधियों पर चढ़ते हैं । जब वे अरणि मन्थन द्वारा प्रकट होते हैं, तब वे पवित्र हुए युवा रूप हो जाते हैं ।४।

अग्नि मातृ-रूपिणी दिशाओं मे बढ़े तथा उन्ही में व्याप्त हुए। वे सतत वेगवान् बढ़ी हुई तथा नयी, सब प्रकार की औषधियों की ओर गति करते हैं।५।
(८)

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते।
देवान् यत् क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे॥६
वि यदस्थाद् यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः।
तस्य पत्मन् दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः॥७
रथो न यातः शिक्वभिः कृतो द्यामङ्गेभिररुषेभिरीयते।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः॥८
त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः।
यत् सीमनु क्रतुना विश्वथा विभुरराान्न नेमिः परिभूरजायथाः॥९
त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि।
तं त्वा नु नव्यं सहसो युवन् वयं भगं न कारे महिरत्न धीमहि॥१०
अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम्।
रश्मीरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः।११
उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः।
स नो नेषन्नेषतमैरमूरो ऽग्निर्वामं सुवितं वस्यो अच्छ॥१२
अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः।१३।६

विश्व-धारक अग्नि बुद्धि बल द्वारा पोषण के लिए मनुष्यों के स्तोत्रों को प्राप्त होते हैं। इसीलिए उन्हें होता रूप में वरण किया जाता है। वे देवता और यजमान दोनों के लिए अन्न की कामना करते हैं।६। जब पूज्य अग्नि वायु की प्रेरणा से बाधा रहित गति करते हैं तब उनकी यात्रा समाप्त होने पर काला मार्ग तथा उसमें धूल ही अवशिष्ट रहती है।७। रथ से यात्रा

करने वाले तेजस्वी के समान, वे आकाश की यात्रा करते हैं। हे अग्ने ! उन वाले दस्युओं को तुम भस्म करते हो। तुम्हारे उपासक वीरों के समान बल प्राप्त करते हैं।८। हे अग्ने ! धृतनियमा वरुण, दानशील अर्यमा और मित्र तुम्हारे द्वारा प्रेरणा पाते हैं। जैसे रथ का पहिया अरों (डण्डों) को व्याप्त करके रहता है, वैसे यज्ञ कर्मों द्वारा अग्नि प्रकट होते हैं।९। हे अत्यन्त युवा अग्ने ! तुम सोम निष्पन्न करने वाले स्तोता को वैभव योग्य धन प्रेरित करते हो। हम अपने कार्य के लिए भग के समान तुम्हारी पूजा करते हैं।१०। हे अग्ने ! हमारे कार्य के लिए धन और घर के लिये सौभाग्य प्रदान करो। तुम दोनों लोकों को रासों के समान वश में रखते तथा यज्ञ में हमारी स्तुति को देवगणके पास पहुँचाते हो।११। अत्यन्त तेजस्वी घोड़ोंके युक्त दमकते हुए रथ वाले अग्ने ! हमारे आह्वान को सुनो। तुम हमको काम्य सुखको प्रेरित करते हुए हमारा कल्याण करो।१२। हमने महान् ऐश्वर्यके लिए अत्यन्त बली अग्नि देव का स्तवन किया है। वे अत्यन्त वृद्धि को प्राप्त हों और हम भी उसी प्रकार बढ़े जैसे सूर्य मेघ के ऊपर चढ़ता है।१३।   (९)

सूक्त १४२

(ऋषि—दीर्घतमाः। देवता—अग्नि आदि। छन्द—अनुष्टुप्, उष्णिक्)

समिद्धो रग्न आ वह देवाँ अद्य यतस्रुचे।
तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥१
घृतवन्तमुप मासि मधुमन्तं तनूनपात्।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥२
शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति।
नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥३
ईलितो अग्न आ वहेन्द्रं चित्रमिह प्रियम्।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥४

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे ।
वृञ्जे देवव्यचस्तममिन्द्राय शर्म सप्रथः ॥५
वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः ।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ।६।१०

हे अग्ने ! तुम प्रदीप्त होकर बढ़े हुए आज इस यजमान के लिए देवगण को लाओ । इस सोम अभिषवकर्ता के लिए प्राचीन यज्ञ को बढ़ाओ ।१। हे अग्ने ! तुम मुझ स्तोता हविदाता के घृत-मधु से युक्त यज्ञ में यज्ञ की समाप्ति तक निवास करो । २ । पवित्र-कर्त्ता, प्रकाशवान देवगण में देव, मनुष्यों द्वारा स्तुत्य ये अग्नि हमारे यज्ञ को तीन बार मधुर रस से सींचें ।३। हे अग्ने ! हम तुम्हारी स्तुति करते हैं । तुम इन्द्र को यहाँ लाओ, मेरा यह स्तोत्र तुम्हारे लिए ही कहा गया है ।४। स्रुक् धारण करने वाले ऋत्विज यज्ञ स्थान में कुशाओं को बिछाते तथा देवताओं को आह्वान करने वाले विशाल यज्ञ मण्डल को इन्द्र के लिए सजाते हैं ।५। यज्ञ को बढ़ाने वाले, पवित्र,कामना के योग्य, विस्तृत यज्ञ द्वार को खोल दो ।६। (१०)

आ भन्दमाने उपाके नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥७
मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम् ॥८
शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।
इला सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥९
तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना ।
त्वष्टा पोषाय विष्यतु राये नाभा नो अस्मयुः ॥१०
अवसृजन्नुप त्मना देवान् यक्षि वनस्पते ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥११
पूषण्वते मरुत्वते विश्वदेवाय वायवे ।

स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥१२
स्वाहाकृतान्या गह्युप हव्यानि वीतये ।
इन्द्रा महि श्रुधी हवं त्वां हवन्ते अध्वरे ।१३।११

सबके स्तुति पात्र, सुन्दर काँति वाले, श्रेष्ठ-अग्नि रूप रात्रि दिवस हमारी कुशाओं पर आकर विराजमान हों ।७। सुन्दर जिह्वा वाले, स्तोताओं की कामना वाले, मेधावी अग्नि-रूप दोनों होता इम सिद्धि दायक यज्ञ को बढ़ावें । ८ । देवों द्वारा स्थापित, यज्ञों को सिद्ध करने वाली पवित्र वाणी रूप भारती, सरस्वती और इला ये तीनों हमारी कुशाओं पर विराजें । ९ । हमारे मित्र स्वामी त्वष्टा स्वयं ही हमको पुष्ट करने वाले अन्न के लिए जल-वर्षा करें ।१०। हे वनस्पते ! तुम स्वयं देवताओं के समीप जाकर यज्ञ करो । मेधावी अग्नि देवताओं के लिए प्रेरणा करते हैं ।११। पूषा और मरुतों से युक्त विश्वदेव रूप वायु के लिये यज्ञ करो । इन्द्र को लक्ष्य कर हवियों को दो।१२। हे इन्द्र ! हमारे मन्त्रों की ओर आकर हवि सेवन करो । हमारा आह्वान सुनो । हम तुम्हें यज्ञ में बुलाते हैं ।१३। (११)

सूक्त १४३

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—जगती, त्रिष्टुप्)

प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद् यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीदहत्वियः ॥१
स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत्॥२
अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवो ऽग्ने रेजन्ते अससन्तो अजराः ॥३
यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर्हिनुहि स्वा आ दमे य एको वस्वो वरुणो न राजति॥४
न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।

अग्निर्जम्भैस्तिगितैरत्ति भर्वति योधो न शत्रून् त्स वना न्यृञ्जते ॥५
कुविन्नो अग्निरुचथस्य वीरसद् वसुभिः कामामावरत् ।
चोदः कुवित् तुतुज्यात् सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥६
घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम् ॥७
अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टे ऽनिमिषद्भिः परि पाहि नो जाः । ८।१२

अग्नि बल के पुत्र हैं । उनके लिए नवीन स्तोत्र भेंट करता हूँ । वे जलों से उत्पन्न हैं और होता रूप से धनों के साथ यज्ञ स्थान में विराजमान हैं ।१। वह अग्नि मातरिश्वा के लिए उच्च आकाशमें प्रकट बुए । उनके उज्ज्वल कर्म से आकाश और पृथिवी दोनों प्रकाशित हुए ।२। उनके अजर प्रकाश और चमकती हुई चिंगारी रूप किरणें बलशाली हैं । वे समुद्र के समान रात्रि को पार करते हुए भी कभी काँपते नहीं ।३। लोकों के स्वामी जिस अग्नि को भृगुओं ने अपने बल से प्रेरित किया, उनकी स्तुति करें । वे वरुणके समान सब धनों के एकमात्र स्वामी हैं ।४। जो अग्नि मरुतों के शब्द, आक्रामक सेना और आकाश के वज्रके समान बाधा रहित हैं, वे वनों को भस्म करते हैं और वनों को योधाओं द्वारा शत्रुओं को भून डालने के समान ही जला देते हैं ।५। अग्नि हमारे स्तोत्र की कामना करते हुए हमारी धन की इच्छा को पूर्ण करें । हमारे लाभ के लिए कर्मों को प्रेरित करें । मैं अग्नि की स्तुति करता हूँ ।६। अग्नि को प्रदीप्त करने वाले यजमान घृत-चिन्ह को मित्र बनाने के इच्छुक हैं । वे प्रकाश के दुर्ग के समान यज्ञ में प्रज्वलित होकर हमारे मन को श्रेष्ठ स्तुति की ओर प्रेरित करते हैं ।७। हे अग्ने ! निरन्तर विश्राम-रहित कल्याण रूप तुम हमारी रक्षा करो, तुम क्लेश-रहित और निद्रा-रहित सामर्थ्योंसे युक्त हो । हमारी सन्तान की सब ओर से रक्षा करो ।८। (१२)

सूक्त १४४

(ऋषि—दीर्घतमः । देवता—अग्निः । छन्द—जगती)

एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥१
अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावस दध स्वधा अधयद् याभिरीयते ॥२
युयूषतः सवयसा तदिद् वपुः समानमर्थं वितरित्रता मिथः ।
आदीं भगो न हव्यः समस्मदा वोहलुर्न रश्मीन् त्समयन्स्त सारथिः॥३
यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥४
तमीं हिन्वन्ति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥५
त्वं ह्यग्ने दिवस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना ।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥६
अग्ने जुषस्व प्रति हर्य तद् वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षया ।७।१३

देवाह्वाता अग्नि यज्ञ की ओर स्तोत्रों को बल देते हुए जाते हैं। वे स्रुचों से आहुति प्राप्त करते हुए उठते हैं।१। अग्नि की ज्वालाएं देवस्थान में, वेदों से घिरे हुए यज्ञ में निकलती हैं। जलों की गोद में अन्तर्हित रहे अग्नि ने प्रकट होकर अपना गुण ग्रहण किया। २। एक रूप वाली दोनों अरणियां परस्पर मिलकर उज्ज्वल रूप वाले की कामना करती हैं। वे अग्नि आह्वान के योग्य हैं। सारथी द्वारा रास पकड़नके समान, अग्नि हमारी घृत धारा को ग्रहण करतें हैं।३। समान अवस्था वाले दो मनुष्य, अग्नि की दिन-रात पूजा करते हैं। वे अग्नि कभी वृद्ध नहीं होते। युवा रहते हुये ही हवि भक्षण करते हैं।४। दश उङ्गलियाँ उस अग्नि की सेवा करती हैं। हम

उन्हें रक्षा के लिए करते हैं। वे बाण की गति के समान चलते हुए नई स्तुतियों को धारण करते हैं ।५। हे अग्ने! तुम आकाश और पृथिवीके प्राणियों के स्वामी हो । वह ऐश्वर्य युक्त दोनों ही तुम्हारे यज्ञ को प्राप्त होते हैं ।६। हे प्रसन्न मन वाले, स्यच्छांवान् बली यज्ञोत्पन्न अग्ने ! प्रसन्न होकर इस स्तोत्र को स्वीकार करो । तुम अत्यन्त रमणीक और ऐश्वर्यों से पूर्ण हो ।७। (१३)

सूक्त १४५

(ऋषि–दीर्घतमाः । देवता—अग्निः । छन्द—-जगती, त्रिष्टुप्)

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन् त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः।१
तमित् पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत् ।
न मृष्यते प्रथमं नापरं वचो ऽस्य क्रत्वा सचते अप्रदृपितः ।।२
तमिद् गच्छन्ति जुह्वस्तमर्वतीर्विश्वान्येकः मृणवद् वचांसि मे ।
पुरुप्रैषस्ततुरिर्यज्ञसाधनो ऽच्छिद्रोतिः शिशुरादत्त सं रभः ।।३
उपस्थायं चरति यत् समारत सद्यो जातस्तत्सार युज्येभि- ।
अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ।।४
स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि ।
व्यब्रवीद् वयुना मर्त्येभ्यो ऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ।५।१४

वे अग्नि सर्वज्ञाता, सर्वत्र गमनशील, सबके स्तुति-पात्र अभीष्ट युक्त एवं महाबली हैं ।१। उन अग्नि को सब जानते हैं । उनके सम्बन्ध में पूछना अनुचित है । स्थिर मन वाला किसी की प्रथम और बाद की बातें नहीं भूलता । इसलिये अहङ्कार से शून्य मनुष्य अग्नि का आश्रय लेता है ।२। उसी अग्नि को आहुतियाँ और स्तुतियाँ प्राप्त होती हैं । वह आह्वानों को सुनने वाला है, यज्ञ को सिद्ध करने वाला तथा बालक के समान बल वृद्धि को प्राप्त होता है । ३ । अग्नि प्रकट होते ही विचारणशील है । वह

तुरन्त ही हवियां ग्रहण करते हैं और थके मनुष्यों की थकानको मिटाकर प्रसन्नता प्रदान करते हैं ।४। वन में फिरने वाला अग्नि ईंधन से प्राप्त होता है । मेधावी यज्ञ ज्ञाता अग्नि मनुष्यों में रहकर यज्ञ कर्म में प्रेरित करता हुआ ज्ञान देता है ।५। (१४)

सूक्त १४६

(ऋषि–दीर्घतमा: । देवता अग्नि: । छन्द–त्रिष्टुप् ।)

त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥१
उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥२
समानं वत्समभि संचरन्ती विष्वग्धेनू वि चरतः सुमेके ।
अनपवृज्यां अध्वनो मिमाने विश्वान् केताँ अधि महो दधाने ॥३
धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत् सूर्यो नॄन् ॥४
दिदृक्षेण्यः परि काष्ठासु जेन्य ईलेन्यो महो अर्भाय जीवसे ।
पुरुत्रा यदभवत् सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ।५।१५

हे मनुष्य ! तीन मस्तक वाले सात किरणों वाले, पूर्ण रूप वाले आकाश और पृथिवी के मध्य विराजमान और प्रकाशित नक्षत्रों में तेज रूप से व्याप्त इस अग्नि का स्तवन कर ।१। इस वीर अग्नि ने आकाश और पृथिवी को सब ओर से व्याप्त किया है । वह जरा रहित और साधनों से युक्त है । पृथिवी के सिर पर अपने पैरों को रखकर खड़े हुए इसकी ज्वालाएँ मेघ रूप स्तन को चाटती हैं ।२। ये आकाश-पृथिवी रूप गौएँ साझे के बछड़े रूप अग्नि को प्राप्तकर सभी कामनाओं को धारण करती हुई विचरती हैं ।३। बुद्धिमान ऋषिगण मनुष्यों की रक्षा करते हुए उनको मार्ग सिखाते हैं । उन्होंने अग्नि की चाहना से समुद्र को सब ओर से देखा, तब मनुष्यों का

कल्याण करने वाला सूर्य उत्पन्न हुआ ।४। दिशाओं के विजेता अग्नि बड़े-छोटे शरीर धारियों के लिये जीवनदाता हुए । वे धन और प्रजाओं को प्रकट करने में समर्थ है ।५। (१५)

सूक्त १४७

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—त्रिष्टुप् ।)

कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः ।
उभे यत् तोके तनये दधाना ऋतस्य सामन् रणयन्त देवाः ।।१
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ।।२
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान् त्सुकृतो विश्ववेदा दिप्सन्त इद् रिपवो नाह देभुः ।।३
यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयाति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ।।४
उत वा यः सहस्य प्रविद्वान् मर्तो मर्तं मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरिताय धायीः ।५।१६

हे अग्ने ! तुम्हारी प्रकाशित किरणें बल युक्त जीवन देती हैं । वे पुत्र पौत्रादिको बढ़ाती हुई पुष्ट करती हैं ।१। हे अत्यन्त युवा अग्ने ! मेरे इस आदर योग्य स्तोत्रको सुनो । एक मनुष्य आपको पीड़ा पहुँचाता है एक स्तुति करता है । मैं तो आपकी स्तुति करने वाला हूँ ।२, हे अग्ने ! तुम्हारी रक्षा से युक्त भक्तों ने ममताके अन्धे पुत्र को बचाया । उन उत्तम कर्म वालों की तुमने रक्षा की । तुम्हें शत्रु किसो प्रकार छल नहीं सकते ।३।हे अग्ने ! ईर्ष्या युक्त अदानशील पापी हमको छल से दुःख देता है । उसका वह कुविचार उसी को भारस्वरूप हो और वह उसी को नष्ट करे ।४। हे बलवान् ! जो मनुष्य छल से किसी को पीड़ित करना चाहता है, उससे स्तोता की रक्षा करो । हम दुःखी न हों ।५। (१६)

सूक्त १४८

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—त्रिष्टुप्)

मथीद् यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ॥१
ददानमिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् ।
जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥२
नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः ।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥३
पुरूणि दस्मो नि रिणाति जम्भैराद् रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥५
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।
अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन् ।५।१७

उन सर्व रूप वाले देव स्वरूप होता का मातरिश्वा ने मन्थन किया और उस सूर्य के समान देदीप्यमान अग्नि को देवगण ने मनुष्यों में स्थापित किया ।१। स्तोत्र उच्चारण करते हुए मुझे शत्रु पीड़ित न कर पाये, मेरी स्तुति सुन अग्नि ने शरण दी और मेरे स्तोत्र को सब देवताओं ने स्वीकार किया ।२। यजमानों ने जिसे ग्रहणकर स्तुतियों से स्थापित किया और रथमें घोड़े जोड़ने के समान आगे बढ़ाया ।३। अद्भुत अग्नि वृक्षोंका वर्णण करता है और प्रकाश से वन में चमकता है । इसकी दमकती हुई ज्वाला की वायु तीक्ष्ण रूप में बढ़ाता है ।४। जिसे अप्रकट रहने पर हिंसक पीड़ित न कर सके और अन्धे इसके माहात्म्य को न मिटा सके । इसके प्रीति करने और नित्य धारण करने वाले ही इस अग्नि की रक्षा करते रहे हैं ।५। (१७)

सूक्त १४९

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—विराट् ।)

महः य राय एषते पतिर्दन्निन इनस्य वसुनः पद आ ।

उप ध्रजन्तमद्रयो विधन्नित् ॥१
स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः ।
प्र यः सस्राणः शिश्रीत योनौ ॥२
आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो नार्वा ।
सूरो न रुरुक्वाञ्छतात्मा ॥३
अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।
होता यजिष्ठो अपां सधस्थे ॥४
अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ।५।१८

वह अत्यन्त ऐश्वर्यवान् धन-स्वामी देने के लिये वज्ञ में आते हैं । सोम कूटने के पाषाण उनके लिए रस तैयार करते हैं ।१। जो आकाश और पृथिवीमें यश-स्वी रहते हैं उन्हें त्यागकर जीव दुःख भोगते हैं । वह अग्नि वेदीमें वास करते हैं ।२। जिसने मनुष्य शरीरमें दोहन किया,वह अग्नि शीघ्रगामी अश्वके समान प्रशंसनीय हैं ।३। दो जन्म वाले अग्नि तीनों ज्योतियों और सब लोकों को प्रकाशित करते हैं । यह अत्यन्त पूज्य होता के रूप में नियुक्त हुए हैं ।४। वह दो जन्म वाले देवताओंके बुलाने वाले हैं । जो मनुष्य इनको हवि देता है, उसे वह वरणीय धन और यश का देने वाला है ।५। (१८)

सूक्त १५०

(ऋषि—दीर्घतमाः । देवता—अग्निः । छन्द—उष्णिक्)

पुरु त्वा दाश्वान् वोचे ऽरिरग्ने तव स्विदा ।
तोदस्येव शरण आ महस्य ॥१
व्यनिनस्य धनिनः प्रहोषे चिदररुषः ।
कदा चन् प्रजिगतो अदेवयोः ॥२

स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि ।
प्रप्रेत् ते अग्ने वनुषः स्याम ।३।१९

हे अग्ने ! आपके आश्रय का इच्छुक स्तोता हवि देता हुआ बार-बार आह्वान करता है ।१। वे अग्नि देवताओं से द्वेष करने वालों के आग्रह पूर्ण आह्वान पर भी नहीं जाते ।२। हे मेधावी अग्ने ! वह मनुष्य अत्यन्त यशस्वी होता है, वह सबको प्रसन्न करता है । तुम्हारे साधक हम सदा वृद्धिको प्राप्त हों ।३। (१९)

सूक्त १५१

(ऋषि—दीर्घतमः । देवता—मित्रावरुणौ । छन्द—जगती)

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः ।।१
यद्ध त्यद् वां पुरुमीलहस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः । २
आ वां भूषन् क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरम् ।।३
प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत् ।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः ।।४
मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन् धेनवः
स्वरन्ति ता उपरताति सूर्यमा निम्रुचं उषसस्तक्वीरिव ।५।२०

प्रकाश की इच्छा से ध्यानरत देवगण ने जीव मात्र की रक्षा के लिये मन्त्र के समान जिस पूजनीय अग्नि को जलों से उत्पन्न किया, प्रकट होने पर उसके बल और वाणी के प्रभाव से आकाश और पृथिवी काँप गये ।१। हे मित्रावरुण ! ऋत्विजों ने तुम्हारे अभीष्टदायी सोमरस को अर्पण किया । इसलिये साधक के घर आकर उसका आह्वान सुनो ।२। हे मित्रावरुण ! तुम्हारी वर्णन योग्य उत्पत्ति आकाश, पृथिवी से बतायी गयी । तुम देवी नियमों का पालन करते और अपने उपासकों के निमित्त प्रकट होते हो । तुम

उत्तम यज्ञों में स्तुतियों द्वारा प्राप्त होते हो ।३। हे मित्र, वरुण ! तुमको यह मनुष्य अत्यन्त प्रिय है । तुम नियमोंकी उच्च स्वर से घोषणा करने वाले हो। तुम बैल को धुरेमें जोतने के समान विशाल आकाश में सामर्थ्य को जोड़ते हो ।४। हे मित्र और वरुण ! तुम वरणीय धनों को प्राप्त कराने वाले हो। गोष्ठ में रहने वाली गौएँ प्रातःकाल और सायंकाल आकाश में उड़ते हुए पक्षियोंके समान सूर्य को देखती हुई रँभाती है ।५।　(२०)

आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मनो सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥६
यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ॥७
युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वां मन्मना संयता गिरो ऽदृप्यता मनसा रेवदाशाथे ॥८
रेवद् वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम् ।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ।९।२१

हे मित्र और वरुण ! जब तुम धर्म मार्ग की उन्नति करते हो तब यज्ञस्थ ज्वालाएँ तुम्हारा स्तवन करती हैं। तुम ऋषियों के स्तोत्र के स्वामी हो। हमारी स्तुतियों की वृद्धि करो ।६। हे मित्रावरुण ! जो स्तोता यज्ञ में तुम्हारे लिए हवि देता है और जो स्तोत्र रचयिता कवि तुम्हारा स्तवन करता है, तुम दोनों उसे प्राप्त होते हुए उसके यज्ञ को काम्य बनाते हो। अतः हमारी स्तुतियों को सुनकर यहाँ आओ ।७। हे धृत नियमा मित्रावरुण ! जों मनुष्य यज्ञों में हार्दिक भावना से तुम्हारा पूजन करते हैं वे स्थिर ध्यान से तुम्हारी स्तुति करते हैं। तुम उन्हें प्राप्त होओ ।८। हे मित्रावरुण ! तुम धनयुक्त बलके धारक हो, मानसिक बलसे रक्षा साधन युक्त हुए महान् बनते हो। दिन, रात्रि नदियाँ और पणि तुमसे देवत्व नहीं पा सके, प्राणियों को तुम्हारा हाल भी नहीं मिला ।९।

(२१)

सूक्त १५२

(ऋषि–दीर्घतमा: । देवता–मित्रावरुणौ । छन्द–त्रिष्टुप् ।)

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्त ो ह सर्गा: ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥१
एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्र: कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥२
अपादेति प्रथमा पद्वतीनां कस्तद् वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥३
प्रयन्तमित् परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥४
अनश्वो जातो अनभीशुरर्वा कनिक्रदत् पतयदूर्ध्वसानु: ।
अचित्तं ब्रह्म जुजुषुर्युवान: प्र मित्रे धाम वरुणे गृणन्त: ॥५
आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन् त्सस्मिन्नूधन् ।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥६
आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ।७।२२

हे मित्र वरुण ! तुम दोनों तेज रूप वस्त्रों को धारण करते हो, तुम्हारी सृष्टियाँ सुन्दर और छिद्र रहित हैं। तुम हर प्रकार से असत्य से दूर रहते हुए सत्य के साथी हो ।१। ऋषियों के वाक्य सत्य हैं कि मित्र वरुण चतुर्गुण अस्त्रों से सुजज्जित हैं और वे त्रिगुणात्मक अस्त्र वालों को नष्ट करते हैं। इनके महत्व को कोई नहीं जानता । देव निंदकों को ये सबसे पहले मारते हैं ।२। पद-रहित उषा पद युक्त मनुष्यों के आगे जाती हैं, इससे कर्म को कौन जानता है ? रात्रिका गर्भस्थ पुत्र सूर्य इस संसार का भार वहन करता हुआ सत्य को ग्रहण करता और असत्य को मिटाता है ।३। हम प्रशस्त तेज रूप वस्त्रधारी मित्रावरुण के स्थान की ओर उषाओं की काँति

क्षीण करने वाले सूर्य को आगे बढ़ता देखते हैं। मित्रावरुण का स्थान पीछे कभी नहीं रहता।४। बिना घोड़े और बिना रास वाला आदित्य प्रकट होते ही ऊँचा चढ़ता और शब्द करता है। मित्रावरुणके स्थान रूप सूर्य की मनुष्य गण स्तुति करते हैं।५। हे मित्र वरुण ! स्नेह दायिनी गौएँ मुझ ममताके पुत्र को अपने थन से उत्पन्न दूध पिलावें। धर्म मार्ग वाले अन्न माँगें और तुम्हारी सेवा करते हुए यज्ञको बढ़ावें।६। हे मित्रवरुण ! मैं अपनी रक्षा के लिये नमस्कार पूर्वक हविदान करूँ। हमारी स्तुतियों के प्रभाव से युद्ध में हमारे शत्रु वशीभूत हों तथा दिव्य वर्षा कर हमको दुःखों से पार लगावें।७। (२२)

सूक्त १५३

(ऋषि–दीर्घतमाः। देवता–मित्रावरुणौ। छन्द–त्रिष्टुप्)

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः।
घृतैर्घृतस्नू अध यद् वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥१
प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः।
अनक्ति यद् वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥२
पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे।
हिनोति यद् वां विदथे सपर्यन् त्स रातहव्यो मानुषो न होता ॥३
नत वां विक्षु मध्वास्वन्धो गाव आपश्च पीपयन्त देवीः।
उतो नो अस्य पूर्व्यः पतिर्दन् वीतं पातं पयस उस्रियायाः।४।२३

हे जल रूप घृत-वर्षक मित्रावरुण ! हम घृत युक्त हवियों से नमस्कार पूर्वक तुम्हारी पूजा करते हैं। हमारे अध्वर्यु तुमको हवि भेंट करते हैं।१। हे मित्रावरुण ! तुम्हारी स्तुति तेज की प्रेरक है। इसलिये मैं सुन्दर स्तुतियों से तेज प्राप्त करता हूँ। जो होता तुम्हें पूजने की इच्छा करता और तुम्हें प्रसन्न करना चाहता है, वह यज्ञमें तुमको घृत युक्त हवि देता है।२। हे मित्रावरुण ! "रातहव्य" के यज्ञ कर्म से प्रसन्न हुए तुमने उसकी गाय को दूध वाली किया था। वैसे ही यजमान तुम्हें हवि देता हुआ अपनी गायोंको अत्यन्त दूध वाली होने की याचना करता है।३। हे स्त्री पुरुषो ! आपके गज आदि साधनों की

वृद्धि हो । आपको पर्याप्त गो दुग्ध उपलब्ध हो ताकि शरीर हर प्रकारसे पुष्ट रहे ।४। (२३)

सूक्त १५४

(ऋषि—दीर्घतमाः । देवता—विष्णुः । छन्द—त्रिष्टुप)

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ।।१
प्र तद् विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।२
प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित् पदेभिः ।।३
यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ।४
तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ।।५
ता वां वास्तून्युश्मसि घमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ।६।२४

मैं वरुण के पराकम का वर्णन करता हूँ । उन्होंने तीन पैरों में लोकों को नाप लिया और आकाश को स्थिर किया । १ । विष्णु के तीन पदों में सम्पूर्ण जगत निवास करता है । अतः पर्वत पर रहने वाले भयङ्कर पशुओं के समान यह संसार विष्णु के पराक्रम की प्रशंसा करता है ।२। जिन विष्णु ने अकेले ही अपने तीन पैरों में तीनों लोकों नाप लिया, उन महा-बली विष्णु की बहुत से जीव स्तुति करते हैं ।३। जिन अकेले ने त्रिगुणात्मक पृथिवी आकाश और सब लोकोंको धारण किया है, वे विष्णु अक्षय स्वतन्त्रता में प्रसन्न रहते हैं और मनुष्यों को मधुर अन्नादि से युक्त करते हैं ।४। मैं विष्णु के उस विस्तृत पद का आश्रय चाहता हूँ जहाँ देवताओं के स्वामित्व को मानने वाले मनुष्य आश्वासन प्राप्त करते हैं । विष्णु ही बन्धु हैं । उनका परमपद ही मधुरता (अमृतादि) का केन्द्र हैं ।५। हे इन्द्र और विष्णो !

हम तुम दोनों के उस स्थान की कामना करते हैं जहाँ अत्यन्त शक्ति वाली सिद्ध रूप गौएँ हैं। स्तुति के योग्य विष्णु का उच्चपद तेज से परिपूर्ण है।६। (२४)

सूक्त १५५

(ऋषि—दीर्घतमाः। देवता—विष्णूः इन्द्राविष्णु। छन्द—जगती)

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥१
त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति।
या मर्त्याय प्रतिधीयमानमित् कृशानोरस्तुरसनामुरुष्यथः ॥२
ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः।३
तत्तदितदिदस्य पौंस्य गृणीमसीनस्य त्रातुरवृकस्य मीलहुषः।
यः पार्थिवानि त्रिभिरिद् विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥४
द्वे इदस्य क्रमणे स्वर्दृशो ऽभिख्याय मर्त्यो भुरण्यति।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥५
चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत्।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम्।६।२५

